पूज्य स्वामीजी


# सूर्योदयः

श्री[illegible]ण्डलस्य
मासिकं संस्कृतमुखपत्रम्

६४ तमे वर्षे ] • वाराणसी • अप्रैल, मई • १९८७ [ अङ्क ४, ५


जयतु सुरभारती


वार्षिकं मूल्यम्
पञ्चदशरुप्यकाणि

प्रत्येकाङ्कस्य
सार्द्धरुप्यकम्

आजीवनशुल्कम्
द्विशतरुप्यकमात्रम्
२०१।००


प्राणाः प्रजानामुदयत्येष सूर्यः
शत० ६।७।६।२०


प्रधान सम्पादकः
**डॉ० परमहंस मिश्रः**


## विन्दुः सृजति विसर्गम्

विन्दुः सृजति विसर्गम्
धीमहि वयं तत्र सवितारं सित-शोणित-भव-भर्गम् ।
विन्दुः सृजति विसर्गम् !
स्वयमनुभवति सृष्टि सीत्कारं वागर्थप्रतिपत्तिम्
परामृशति संवित् स्वात्मानं स्वोन्मिषितां संवित्तिम्
उल्लसिषा श्लिष्यति उन्मेषं संसृतिरप्यपवर्गम् ।
विन्दुः सृजति विसर्गम् !
आकारयति सर्वतः प्रसृतां सुषमां सुरभि समूहम्
मुकुलीभवति यदा शतपत्रं सायं रचयत् व्यूहम्
उषसि करोति विश्वमुद्वसितं सुरभिः शयते स्वर्गम् ।
विन्दुः सृजति विसर्गम् ।
तिग्मदीधितौ दीधितिरथवा वाचि नवार्थनिवेशः
विन्दौ सिन्धुतरङ्गरिङ्गणं स्वस्मिन् सर्वोन्मेषः
विस्मय-विषयः नैव, चेतना रचयति नवोपसर्गम्
विन्दुः सृजति विसर्गम्
कविता-कला कलितलतिका ननु कलयति किमपि सलीलम्
येन वचश्चैतन्यविताने विमृशति शक्तिः शीलम्
भवति तदेव परमरमणीयं कर्षति सहृदयवर्गम्
विन्दुः सृजति विसर्गम्

**डॉ० परमहंस मिश्रः**

# विषय-सूची


| क्रमाङ्काः विषयाः | लेखकाः | पृष्ठाङ्का |
|---|---|---|
| १—प्रार्थना—जयतिभारतवसुन्धरा | महर्षिज्ञानानन्दचरितात् महाकाव्यात् | १ |
| २—श्री शक्तिगीता | भगवत्पूज्यपादाःमहर्षयः स्वामिनः ज्ञानानन्दगुरुवर्याः | २ |
| ३—सम्पादकीयम् | | ३—४ |
| ४—नमोऽस्तु तस्मै परमात्मने भृशम् | | ४ |
| ५—'कालिदासीयकाव्येषु हिमालयीयपर्यावरणम् आधुनिकसन्दर्भे च तस्याध्ययनम्' | श्री द्वारिका प्रसाद त्रिपाठी | ५—६ |
| ६—श्री शारदा—संस्तवनम् | श्री रामस्वरूप शास्त्री अमरः | ८ |
| ७—'छात्राणां पर्यावरणम्' | श्री लक्ष्मी प्रसाद नैथानी | ९—१० |
| ८—आधुनिक भारत-निर्माणे संस्कृतमुपपुज्यते | छात्रः कामेश्वर शुक्लः | १०—११ |
| ९—"संस्कृतशिक्षणस्य सरलतमोविधिः" | श्री हरिपति सहायः कौशिकः | १२—१३ |
| १०-राम-राज्यं भवेत | श्री रामस्वरूप शास्त्री अमरः | १४ |
| ११-सूक्तयः | | १५ |
| १२-ब्रजगीतिः | डॉ० वासुदेवकृष्ण चतुर्वेदी | १६ |
| १३-नैतिक शिक्षा कुतः प्रारभते | डॉ० रामप्रताप तिवारी | १७-१९ |
| १४-वेदे इन्द्रविषयिणी अनास्था | डॉ० शैलजा पाण्डेय | १९—२१ |
| १५-संस्कृतम् आंगलभाषा च | डॉ० सुरेन्द्र अज्ञातः | २१—२५ |
| १६-पद्य-पद्यत्वम् | डॉ० रमाकान्त शुक्लः | २६—२८ |
| १७-इलाहाबाद विश्वविद्यालयशताब्दीसमारोहावसरे समायोजिता त्रिदिवसीया संस्कृताभ्युदयसंगोष्ठी | डॉ० अभिराज राजेन्द्रमिश्रः | २८ |
| १८-धन्यो गृहस्थाश्रमः, आत्म-निवेदनम् | श्री रामस्वरूप शास्त्री अमरः | ३१-३२ |


# दिलीपस्य उत्तरकोशलेश्वरता प्रामाणिकी

## श्री वासुदेव शास्त्री 'अतुल' महामन्त्री

साप्ताहिक गाण्डीवे त्रयोविंशतिट ङ्कारे २३ फरवरी १ मार्च १९९७ दिनाङ्के प्रकाशिते पंचमपृष्ठे नीर-क्षीर-विवेकः स्तम्भे (९०) नवति संख्याके "दिलीपस्य उत्तरकोशलेश्वरता अप्रामाणिकी" शीर्षके— कोशलेषु कुशं वीरमुत्तरेषुतथालपम् । अभिषिच्यमहात्मातावुभौरामः कुशीलवौ ॥ (वा. रा. ७-१०७-१७)

इत्यनुसारेण कोशल नामकं राज्यं दाशरथिना रामेण द्विधा विभज्य पुत्राभ्यां कुशलवाभ्यां प्रदत्तम् । तत्पूर्वं दिलीप काले-उत्तर कोशलनामकं राज्यंनैवासीदिति डॉ० रामशङ्करभट्टाचार्य महाभागानांकथनं रामायणविरुद्धमेव । वस्तुतस्तु प्राचीनकाले देशस्य राज्यस्यवा विभाजनं नैवासीत् । इमौ कुशीलवौ राजन्नभिषिच्य नराधिप । कोशलेषुकुशंवीरमुत्तरेषुतथा लवम् ॥ ( वा. रा. ७-१०७-७ )

तिलक कारेण-उत्तरेषु-भस्यशब्दस्य उत्तरकोशलेषु एवार्थः कृतः । कुशस्य नगरी रम्या विन्ध्य पर्वतरोधसि । कुशावतीति नाम्ना साकृतारामेण धीमता । श्रावस्तीति पुरी रम्या श्राविता च लवस्य ह । अयोध्यांविजनांकृत्वा राघवोभरतस्तथा ॥ ( वा० रा० ७-१०८-४-५ )

कुशस्य नगरी विन्ध्यपर्वतरोधसिवर्णिता । उत्तर कोशले विन्ध्यपर्वतस्यस्थिति नैवासीत् ।

कोसला मध्यदेशस्थे नीवृद्भेदेतृभूमनि । १९०६ वाङ्मयार्णव कोशानुसारेण मध्यदेशेऽपि कोशलदेश आसीत् । उत्तरकोशलो नामधेयः कश्चिदपि जनपदो नासीदिति कथनं न प्रामाणिकम् । महाकवि कालिदासस्य रघुवंशमहाकाव्ये "इतिस्म पृच्छत्यनुवेल माद्दतः प्रियासखीरुत्तरकोशलेश्वरः वर्णिता, दिलीपस्य-उत्तर कोशलेश्वरता प्रामणिकी— एव ।"

# सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

६४ तमे वर्षे ] * वाराणसी * अप्रैल-मई १९८७ * [ अङ्कः ४-५

## • जयति भारतवर्षवसुन्धरा •

हिमनता मुकुटेन विराजिता जयति सप्तविकोटिसुता चिता ।
हिमत पराजित पूर्णसुधाकरा, जयति भारतवर्षवसुन्धरा ॥
अमृतपङ्कज - भास्वरितानना छविविनिन्दित-नन्दन—कानना ।
अमल-कोमल-विम्बफलाधरा जयति मे सुजलासुफला धरा ॥
महित—राघव-माधवमातृता विहित वर्गचतुष्टय-दातृका ।
अधिगतामुनिभिश्च यतोऽननिर्जयति मे वरदा भरतावनिः ॥
प्रणतमानवबुद्धिविकासिनी प्रबल राक्षस-वेश-विनाशिनी ।
सुमतिदा विशदा भयहारिणी जयति मा परमामयवारिणी ॥
सुखद सुन्दरशालिनी सुमयमूहलसद्—गिरिमालिनी ।
बहु नवाऽऽप्रपर्दान-कचार्चिता जयति विश्वजनीन गुणार्चिता ॥
श्रुतिशुचिस्मृतिदर्शन--हेतवे विधुर - वीचि-भावार्णव-सेतवे ।
निखिल वाञ्छित कामदधेनवे तव धरित्रि ! नमोऽघ्रिजरेणवे ॥

—महर्षिज्ञानानन्दचरितात् महाकाव्यात्

# * श्रीशक्तिगीता *

भगवत्पूज्यपादाः महर्षय स्वामिनः ज्ञानानन्दगुरुवर्याः

कर्मविज्ञानयोगवर्णनम्

गुणत्रयात्मिका देवाः ! विद्यते प्रकृतिर्मम ।
नात्र कश्चन सन्देहो विद्यतेऽदितिनन्दनाः ! ॥ ६१ ॥

संस्कारो बीजतुल्योऽस्ति कर्म्मात्राङ्कुरसन्निभम् ।
अतो नष्टे हि संस्कारे कर्म्मणः सम्भवः कुतः ॥६२॥

जन्यत्वात्प्रकृतेः साक्षात्सहजं कर्म्म कोविदाः ।
उत्पत्तेरपि मोक्षस्य जीवानां कारणं विदुः ॥ ६३ ॥

प्रातिकूल्येन जैवन्तु जीवानां कर्म्म बन्धनम् ।
यावज्जैवं न वै कर्म्म संस्कारै वैदिकैः शुभैः ॥ ६४ ॥

पूर्णं शुद्धं समाप्नोति दशां स्वाभाविकीं हिताम् ।
तावन्नूनं भवेत्पूर्णं जीवकैवल्यबाधकम् ॥ ६५ ॥

धर्म्मस्य धारिका शक्तिस्तस्य चाभ्युदयप्रदः ।
क्रमः कैवल्यदश्चैव सहजे प्राकृते शुभे ६६ ॥

नित्यं जागर्त्ति संस्कारे प्राणिनां हितसाधके ।
विश्वकल्याणदे नित्ये सर्वश्रेष्ठे मनोरमे ॥ ६७ ॥

संस्कारेष्वहमेवास्मि सर्व्वेष्वक्तेषु सन्ततम् ।
संस्थिता धर्म्मरूपेण निश्चितं विबुधर्षभाः ॥ ६८ ॥

नारीजातौ तपोमूलः सतीधर्म्मः सनातनः ।
स्वयमेव हि संस्कार-शुद्धिं जनयते ध्रुवम् ॥ ६९ ॥

वर्णाश्रमाख्यधर्म्मस्य मर्य्यादा नितरां तथा ।
नृजातावपि संस्कार-शुद्धिं जनयतेतराम् ॥ ७० ॥

[ क्रमशः

## सम्पादकीयम्—

शाङ्करदिग्विजयम् नामकं संस्कृत महाकाव्यं शोभते षोडश सर्गात्मकम्। आद्यशङ्कराचार्यस्य जीवनं तत्र निरूपितं वर्तते। इदम् ग्रन्थरत्नं स्वामिना विद्यारण्येन विरचितम्। काव्यमिदं विश्व-विश्रुतम्। सर्वैः संस्कृतज्ञैः कृतिरियमभिनन्द्यते मौलिकी च मन्यते। अद्वैत वेदान्त प्रस्थापनप्रथमाचार्याणा माद्यशङ्कराचार्याणाम् परमालोकललामं लौकिकमप्यलौकिकमलोक-सामान्यम् चरितं ग्रन्थेऽस्मिन् वर्णितम् प्रतिपादितं च यात्रासु शास्त्रार्थ-समये वेदान्तसिद्धान्तस्य सर्वोत्कृष्टं महत्त्वम्। ग्रन्थस्य पञ्चदशे सर्गे कृतिकारः कथयति यत् -

इति-सकलदिशासु द्वैतवार्त्तानिवृत्तो
स्वयमथ परितस्ता रायमद्वैतवर्त्म।
प्रतिदिनमपिकुर्वन् सर्व संदेहमोक्षं
रविरिव तिमिरौघे संप्रशान्ते महःस्वम्।

एतेन विज्ञायते यत् यति-चक्र-चूडामणिना साक्षात् शंकरावतारेण शङ्कराचार्येणाद्वैतवेदान्त-ध्वजः विश्वस्मिन् विस्फारितः। सर्वे च तात्कालिक-भारतवर्षे विद्यमाना सम्प्रदायवादिनः परास्ताः।

अस्मिन्नेव सन्दर्भे षोडशे सर्गे एका घटनापि वर्णिता। स्वामी विद्यारण्यः श्लोकद्वयमाध्यमेन कथयति—

अथ यदा जितवान् यतिशेखरोऽ
भिनवगुप्तमनुत्तम —मान्त्रिकम्।
स तु तदापजितो यतिगोचरं।
हतमनाः कृतवानपगोरणम्॥
स ततोऽभिचचार मूढबुद्धि
र्यतिशार्दूलममुं प्ररूढरोषः।
अचिकित्स्यतमो भिषग्भिरस्मा—
दजनिष्टास्य भगन्दराख्यरोगः।

श्रीमदभिनव गुप्तपादाचार्याः न केवलं मान्त्रिका एव विश्रुता अपितु साहित्य शास्त्र-पारङ्गताः साहित्यिके जगति रससिद्धान्तप्रवर्त्तकाः महामाहेश्वराचार्यवर्यरूपेण विख्याताः महापुरुषाः सन्ति। संस्कृतवाङ्मयविभूतिभूषितैरेभिः चत्वारिंशत्तोऽप्यधिकाः ग्रन्थाः संरचिताः। श्रीतन्त्रलोक-सदृशमागमसागरं प्रवर्त्तयतृणामुपरि शङ्कातङ्क-कलङ्क लेपनं सर्वथा वैमनस्य बीजविषवृक्षरोपण-मिव परमानर्थकरमेव केवलं प्रतिभाति।

शाङ्करदिग्विजय प्रसङ्गे शाक्ताः, पाशुपताः क्षपणकाः, कापालिकाः, वैष्णवाः, काणादाः गौत-मीयाः, कापिलाः पातंजलाः सर्वे चान्ये सम्प्रदाया-चार्याः परास्ता इति दिग्दर्शितं तत्र[1]। सर्वे वशंवदाः जाताः। श्रीमदभिनवगुप्तविषये १५।१५८-१५९ श्लोकद्वये व्याजहार ग्रन्थकारः यत्।

'परिहृत्य जनापवादभीत्या
यमिनः शिष्य इवान्ववर्त्ततैषः।' इत्युक्त्या द्विगुणं कलङ्कयति शाङ्करदिग्विजयकारः महामाहे-

१—शाङ्करदिग्विजयम् १५-१५६-१७४

श्वराचार्यवर्यम् । एकतः शिष्यतां सः स्वीचकार शिष्यः सन्नपि गुरुं प्रति विश्वासघातमाचरितं तेन । द्वितीयतः अनुत्तममान्त्रिकः सन्नपि विद्वेष-वह्निदग्धः समभिचचार । तस्य विषये 'हृतमनाः' 'मूढबुद्धिः' इति विशेषणयोः प्रयोगश्चाकारि तत्र

सर्वमेतत् विद्वेषबुद्धया प्रवर्त्तितमिदं कल्पितं कथानकमिति निश्चप्रचम् । षोडशसर्गस्यैव नवमे श्लोके लिखितमस्ति यत्—

व्याधिर्हि जन्मान्तरपापपाको
भोगेन तस्मात् क्षपणीय एषः ।
अभुज्यमानः पुरुषं न मुञ्चेत्
जन्मान्तरेऽपीति हि शास्त्रवादः ॥

एतादृशे सिद्धान्ते सत्यपि कमप्यवतारिकं विभूतिमन्तं सत्त्वं, श्रीमन्तं सदूर्जितं च पुरुषं कलङ्कयितुं प्रवृत्तं कमपि कृतिकारं कोऽपि वरेण्य-विचारकं नैव वक्तुं शक्नोति ।

ऐतिहासिक दृष्टयाऽऽद्यशङ्कराचार्यवर्याणां कालः ७८८ खीष्टाब्दादारभ्य ८२० खीष्टाब्दपर्यन्तं सिद्धः सर्वमान्यश्च वर्त्तते । महामाहेश्वराचार्य-वर्यस्याभिनवगुप्तस्य कालः ९५० खीष्टाब्दादारभ्य १०२५ खीष्टाब्दपर्यन्तं मन्यते । अस्मिन्कालान्तराले भारतीयसंस्कृतिरथः श्लथतयैव प्राचलत् । त्रिशतोत्तर शततमवर्षानन्तरं जनिं प्राप्तवतां सर्वतोन्मुखशेमुषी-काणां तन्त्र, स्तोत्र, काव्य, नाटच दर्शनविषय-रहस्य-समुद्घाटकानां महापुरुषाणामुपरि कलङ्क पङ्क निपातनम् सर्वथैव अमान्यमिति शम् ।

●

## : नमोऽस्तु तस्मै परमात्मने भृशम् :

श्री सच्चिदानन्दमयात् परात्मनः
समुद्गतं विश्वमिदं यतो विभोः ।
स्थितिश्च यस्मिन् जगतो लयोऽपि च
नमोस्तु तस्मै परमात्मने भृशम् ॥

एकं रूपविवर्जितं निखिलगं ध्यायन्ति पञ्चात्मना,
विष्णुं वैष्णवपुंगवाः गणपतिं यं गाणपत्या जनाः ।
शक्तिं तच्चरणारविन्दरसिकाः सौर्याश्च सूर्यं, शिवम्
शैवा यं समुपासते नम इदं लीलात्मने स्तान्मम ॥

यो निर्गुणो मनोवाचामगोचरतया स्थितः
सोयं साधककल्याणं विधातुं सगुणां तनुम्—
धृता नयति तानाशु परमं पदमव्ययम् ।
गीतासु वर्णनं भेदात् सोऽधुना संनमस्यते ॥

# 'कालिदासीयकाव्येषु हिमालयीयपर्यावरणम्, आधुनिकसन्दर्भे च तस्याध्ययनम्'

लेखकः — द्वारिकाप्रसादत्रिपाठी,
प्रवक्ता संस्कृतविभागे, गढ़वालविश्वविद्यालयस्य गढ़वालश्रीनगरस्थस्य ।

अनेहसि वर्तमाने मानवकृतवैज्ञानिकक्रिया-कलापेन विश्वस्य पर्यावरणमतिदूषितं जातम् । येन प्राणिजीवनं कष्टमयं जातम् । विविधप्रकारकैर्व्याधिभिर्मनुष्या वन्यप्राणिनश्च पीडिताः सन्ति । सर्वत्राऽशान्तिरेवाऽवलोक्यते । अतएव विज्ञा जनाः पर्यावरणं प्रति जागरिता दृश्यन्ते । अखिलेऽस्मिन् विश्वे विश्वविद्यालयेषु, महाविद्यालयेषु, स्वायत्त-शोधसंस्थानेषु अन्येष्वपि च स्थानेषु पर्यावरण-मादाय चर्चा भवन्ति, आधुनिकयुगे समाजविज्ञान-परज्ञानपरकः कोऽपि विषय एतादृशो नास्ति यत्र पर्यावरणस्याध्ययनं नापतति । अतः स्वभावत एव समुदेति-प्रश्नोऽयं 'किं पर्यावरणमिति ? व्युत्पत्त्या तु परित आवृणोति आच्छादयति यत् तत् पर्यावरण मिति व्युत्पत्तिलभ्योऽर्थो ज्ञायते । पर्यावरणं परिवेशोऽस्ति । अस्माकं परितो बहूनि वस्तूनि स्थितानि सन्ति । तेषां प्रभावोऽस्माकं जीवने पतति । तानि सर्वाणि वस्तूनि समवायेन पर्यावरणं सृजन्ति । संस्कृतिः, सभ्यताः, राजनीतिः, अर्थव्यवस्था, धर्मः, दर्शनं, साहित्यं जलं, वायुः, आकाशः, सूर्यः, चन्द्रमाः, नक्षत्राणि, वृक्षाः, ओषधयः, वनस्पतयः, नद्यः, सरांसि, जलप्रपाताः, मनुष्या, पशवः, कीटाः, पतङ्गादयश्चेति पर्यावरणस्य निर्माणे महतीं भूमिकामावहन्ति । अत एव सर्वाण्येतानि तत्त्वानि पर्यावरणस्याङ्गानि कथ्यन्ते । पर्यावरणं द्विविधं वक्तुं शक्यते प्राकृतमप्राकृतञ्चेति । प्रकृतिप्रदत्तं पर्यावरणं प्राकृतपर्यावरणं मानवनिर्मितञ्चाप्राकृत-पर्यावरणम् । यदा पर्यावरणेऽसन्तुलनं विकृतिर्वा-जायते तदैव तद् दूषितं भूत्वाऽनर्थकारि भवति । जीवनसुरक्षायै प्राकृताप्राकृतपर्यावरणयोः प्राकृत-मधिकं महत्त्वपूर्णं भवति । पर्यावरणस्य प्रभावः सर्वेषां प्राणिनां क्रियाकलापेषु पतति । अत एव महाकवीनां काव्येषु, नाटकेषु कथासु च सर्वत्र पर्यावरणीयतत्त्वानि निबद्धानि दृश्यन्ते ।

पर्यावरणदृष्ट्या हिमालयस्यातिमहत्त्वमस्ति । यत एतदीयस्य पर्यावरणस्य प्रत्यक्षं प्रभावोऽखिलेऽस्मिन् विश्वे पतति । भारतस्य पूर्णं पर्यावरणं हिमालयाश्रितमेवाऽस्ति । प्राचीनकाले हिमालयस्य पर्यावरणमाधुनिककालापेक्षया रम्यमासीत् । अत एव हिमालये बहूनां तत्त्ववेत्तॄणामृषीणामाश्रमा आसन् । अत्र श्यामायमानानि वनानि आसन् तेषु च पशूनां पक्षिणाञ्च बाहुल्य मासीत् । धर्मार्थकाममोक्षार्थं जना देशाद्विदेशाच्चात्रैव समायान्ति स्म । वैदिक साहित्ये, जैनसाहित्ये, बौद्धसाहित्ये, महाभारते, पुराणेषु कालिदासीयकाव्येषु किरातार्जुनीये अन्येष्वपि च ग्रन्थेषु हिमालयस्य पर्यावरणं मिलति । परन्तु विस्तरभयान्मयाऽस्मिन् लेखे कालिदास

कृतिष्वेववर्णितस्य हिमालयीयपर्यावरणस्याधुनिक-सन्दर्भेऽध्ययनस्य प्रयत्नः कृतः। यद्यपि कालगतिं सम्यगजानाः केचिज्जनाः कालिदासेन वर्णितस्य पर्यावरणस्य यथार्थतां विश्वसितुं न शक्नुयुः, परन्तु ये कालगतिज्ञा विद्वद्वर्या आचार्या स्तेऽवश्यमेव विश्वसिष्यन्ति विश्वसन्ति च।

महाकविकालिदासस्य सप्त कृतयः सन्ति। ऋतु संहारं मेघदूतञ्चेति द्वे खण्डकाव्ये। कुमार-सम्भवः, रघुवंशश्चेति द्वे महाकाव्ये। मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलञ्चेति त्रीणि रूपकाणि। एतेषां मेघदूते, कुमार-सम्भवे, रघुवंशे, विक्रमोर्वशीये, अभिज्ञानशाकुन्तले च हिमालयीयपर्यावरणस्य मनोहारि वर्णनं दृश्यते। मेघदूतस्य पूर्वार्द्धे हिमालयपादेऽवस्थितस्य कनखलस्य, कनखलमुत्तरेण स्थितस्य क्रौञ्चरन्ध्रस्य, कैलासपर्वतस्य, मानसरोवरस्य च वर्णनं मिलति। मेघदूतस्योत्तरार्द्धे कैलासस्य क्रोडे राजमानाया अलकापुर्या रम्यं पर्यावरणं कविना दर्शितम्। कुमारसम्भवस्याखिलभौगोलिकपरिवेशो हिमालय एवास्ति। तत्र प्रथमसर्गे प्रथमश्लोक एव कविना हिमालयो देवतात्मा, नगाधिराजः, पूर्वापरातोयनिधी वगाहमानश्च पृथिव्या मानदण्ड इब कथितः। एभि विशेषणैर्हिमालयीयपर्यावरणस्य पवित्रता, औन्नत्यं, महत्त्वञ्च ध्वन्यन्ते। रघुवंशस्य प्रथमे, द्वितीये, चतुर्थे च सर्गे हिमालयवर्णनमस्ति। विक्रमोर्वशीये त्रोटके कार्तिकेयस्य गन्धमादनोपवनस्य वर्णनं मिलति। गन्धमादननामा पर्वतो बदरीनाथस्य समीपेऽवस्थितोऽस्ति।

अभिज्ञानशाकुन्तलेऽपि हिमालयस्य बहु वर्णनं विद्यते। अत्र कण्वाश्रमस्य मारीचाश्रमस्य च शान्तं पर्यावरणं कस्मै शान्तचेतसे नो भाति ? कालिदासेन प्राकृताप्राकृतपर्यावरणयोः प्राकृतपर्यावरणस्य वर्णनमधिकं कृतम्। कालिदासीयकृतिषु हिमालये वृक्षाणां, विविधौषधीनां, लतानां, शाद्वलानां, सिंहानां, वराहाणां, गजानाम्, अष्टापदानां, सारङ्गानां, चमरीणां राजहंसानां, बर्हिणां, शुकानां, पिकानां, सारिकाणां, बलाकानां, चातकानाम्, उल्लूकानां, सानूनां, गह्वराणाम्, अधित्यकानाम्, उपत्यकानाम, आश्रमाणां, जलप्रपातानां, नदीनां, रत्नानां हिमानाम्, अन्येषामपि च वस्तूनां स्थितेरुल्लेखोऽस्ति। कालिदासीयकाव्येषु हिमालय-सन्दर्भे समाजस्य, सभ्यतायाः, संस्कृतेः, राजनीतेः, अर्थव्यवस्थायाः, धर्मस्य दर्शनस्य च बहु वर्णनं दृश्यते। रघुवंशे द्वितीये सर्गे वशिष्ठाश्रमस्य निकटे श्यामायमानानि वनानि कविना वर्णितानि। एषु-वनेषु पल्वलानि, वृक्षाः, पक्षिणोऽपि वर्णितानि। कालिदासीयकाव्येषु हिमालये देवदारूणां, लोध्राणां, नमेरूणां, भूर्जाणां, पलाशानां, कीचकानां, रक्ताशोकानां, तिलकानाम्, आम्रवृक्षाणां, केसराणां, माधवीनां, शिरीषकुसुमानां सरलानां, वेतसां, कुन्दपुष्पाणां, नवमालिकानां, कमलानां, दूर्वाणां, दर्भाणां, कदलीनां, नीवाराणां, मन्दारवृक्षाणां कुमुदिनीनाञ्चोपस्थितेरुल्लेखोऽस्ति। एतेषामुल्लेखेन हिमालयीयौषधीवनस्पतीनामवस्थितिरतिशोचनीया। शासनद्वारा प्रचारितेन तथाकथित-विकास कार्येणाऽत्र वनस्पतीना मौषधीनाञ्च बिनाश एव सञ्जात इति मे मतम्। सर्वत्र नग्नानि

शिखराण्येव दृश्यन्ते : वनसुरक्षार्थं सर्वकारेण यो यः कार्यक्रमः प्रचालितः सोऽपि सफलो न दृश्यते-जनतायाः पूर्णसहयोगस्याभावात्। कालिदासस्य काव्येषु वन्यजीवानां वर्णनमपि हिमालयसन्दर्भे दरीदृश्यते : यथासिंहाः गजाः, वराहाः, अष्टापदाः, मृगाः, चमर्यः, राजहंसाः शुकाः, पिकाः मयूराः, सारिकाः, द्विरेफा इत्यादयः।

अधुना वनस्पतीना महरहरुच्छेदेन वन्य-प्राणिनो लुप्ता इव सञ्जाताः।

कालिदासेन यद् भौगोलिकपर्यावरणं हिमाल-यस्य वर्णितं तदपि रम्यं प्रतिभाति। गङ्गा नदी अत्र वहति। सा पुण्यफलदायिनी अस्ति। गङ्गाया अपरनाम मन्दाकिनी अस्ति। मन्दाकिन्या सलिल-शिशिरो वायुः आतपं परिहरति। अभिज्ञान-शाकुन्तले मालिन्या मनोहरता कण्वाश्रमस्य पर्या-वरणं वरणकरं करोति सर्वस्मै सचेतसे। शिखराणि, गह्वराणि, जलप्रपाताः, अधित्यका उपत्यका इत्या-दीनि हिमालयस्याङ्गानि पर्यावरणदृष्टया महत्त्व-पूर्णानि सन्ति।

यद् वर्णनं कालिदासकृतिषु हिमालयस्य दृश्यते तदनुसारं हिमालये सर्वत्र सम्पन्नताऽसीत्। मेघदूते-ऽलकापूरीवर्णन-- सम्पन्नता स्पष्टमेवावलोक्यते। अलकापुर्यां महोच्चाः प्रासादा आसन् तेषां भूमयो मणिमया भवन्ति स्म। धनपतेः कुबेरस्यात्रैव वास आसीत्। अत्रत्या रमण्यो बहुभिरलङ्कारैः शोभ-माना आसते स्म। रात्रौ प्रकाशार्थं रत्नप्रदीपाः प्रयुज्यन्ते स्म : अत्र कन्याः कनकसिकतामुष्टिनि-क्षेपगूढैरन्वेष्टव्यैर्मणिभिः संक्रीडन्ते स्म। स्वर्णस्य बाहुल्यमासीत्। कुमारसम्भवे कविना अनन्तरत्न-प्रभवस्य यस्ये'ति कथनेन हिमालयस्य रत्नप्रभवता प्रकटीकृता। एभि र्वर्णनैः कालिदासयुगे हिमालय-स्यार्थिकपर्यावरणमासीदतिसम्पन्नम्। हिमालय-गर्भेऽद्यापि बहूनि रत्नानि विराजमानानि सन्ति, परन्तु तेषामन्वेषणस्यावश्यकता वर्तते।

कालिदासकृतिषु हिमालयीयसांस्कृतिकपर्या-वरणस्य वर्णनमपि चिन्तावर्जकं दृश्यते। रघुवंशस्य रघुदिग्विजयात्मके चतुर्थे सर्गे हिमालयीयगणाना मुल्लेखोऽस्ति ते गणा उत्सवप्रिया आसन्। अत एव उत्सवसंकेताः कत्थ्यन्ते स्म। मेघदूतेऽलकापुर्याः पर्यावरणं सङ्गीतमयं चित्रितं कविना। तत्रत्या रमण्यो गाने वादने च निपुणा भवन्ति स्म। चित्र-कर्मणः प्रयोगोऽपि हिमालये भवति स्म। कालिदासेन हिमालयो देवतात्मा कथितोऽत तत्रत्यं धार्मिकः-पर्यावरणं सुरम्यं ध्वनति स्म प्राचीनकाले। शैवधर्मस्यात्र विशेषः प्रचारः पुरासीत्। सांस्कृतिक-दृष्टया धार्मिकदृष्टया च हिमालयस्य संस्कृतिरद्या-प्युन्नताऽस्ति। इहत्या मूलनिवासिनो देवतात्मान एव सन्ति।

# श्रो शारदा—संस्तवनम्

रच० ---रामस्वरूप--शास्त्री अमरः

तालबेहट ( ललितपुर ) स्थः

सर्वदा सर्व-दा शारदा सार--दा ,
या विपत्पारदा सा पराम्बा मता ।
सङ्गता सर्व--देवैः प्रहर्षङ्गता ,
वन्दिता विष्णुना जिष्णुना संस्तुता ॥ १ ॥
पण्डितो यत्कृपातो भवेन्मण्डितोऽ--
खण्डितो देश सैषः सदा नन्दितः ।
पातु सा शारदा ब्रह्मलोकस्थिता ,
सम्मता देवदेवैः स्वयं वन्दिता ॥ २ ॥
ब्रह्मणा विष्णुना शूलिना संस्तुता ,
सर्वदेवै र्नरै दानवैः पूजिता ।
सर्वदा शं विदध्यान्मुदा शारदा ;
शोक–संहारिकाऽज्ञान--तामिस्रहा ॥ ३॥
सेवकोऽयं सहायं विना दुःखित—
स्त्वं विधत्तां सुरक्षां जगत्पालिके ॥
सम्बलं सौख्यदे ! भक्तिदे ! देहि मे ,
साधवोऽसाधवो लालिताः पालिताः ॥४॥
करालेऽस्मिन् काले वरसरसिजाक्षी सुविमले !
त्वमेवाद्याशक्तिः सततमनुरक्ति र्भवतु मे ।
अभद्रं भ्रूभङ्गाद्धरतु वर–वीणा धृत-करे ! ;
सरस्वत्या मातुश्चरण शरणं वाद्य निधनम् ॥५॥
ईति-- भीतिभयात्पाहि ’
शरदिन्दु-- निभानने !
अपहृत्य तमोजालं
सर्वानर्थान् प्रपूरय ॥ ६ ॥

# 'छात्राणां पर्यावरणम्'

डॉ० लक्ष्मी प्रसाद नैथानी
श्रीनगरम्, गढ़वालस्थः

अधुना छात्रेष्वनुशासनहीनतानैतिकपतनयोः कारणादध्यापकाः, अभिभावकाः सर्वकारश्च सर्वे चिन्तिताः सन्ति, अस्य, कृते माध्यमिकविद्यालयेषु नैतिकशिक्षापृथग्रूपेण पाठ्यते, नूतनशिक्षणविधयः प्रयुज्यमानाः सन्ति मनोवैज्ञानिकपाठ्यक्रमा निर्मीयन्ते, नवीनशिक्षानीतिः प्रयुज्यते, किन्तु परिणामः……? किमस्य कारणम्…?

कतिपयामूलप्रवृत्ती विहाय शिशुः यत्किञ्चिदपि शिक्षते तत्सर्वं पर्यावरणादेव एतत्तथ्यं सर्वे वैज्ञानिकाः, शिक्षाशास्त्रिणश्च स्वीकुर्वन्ति। शिशुः पूर्वंनिर्मित पर्यावरणे एव जायते, यस्मिन् पर्यावरणे च नूतनसामाजिकमूल्यानि क्रमशः सम्मिल्य तद्दूषयन्ति पुनन्ति वा तेष्वपिसामाजिकमूल्येषु जनसामान्यस्यापेक्षया विशिष्टजनानामेव प्राधान्यं वर्तते, प्रजाश्च विशिष्टजनानेवानुकुर्वन्ति, ततश्च पर्यावरणं निर्मीयते। यथा वाल्मीकिरामायणे भरतेन राज्याभिषेकाय निवेद्यमानोऽपि रामः राज्यभारं न स्वीकरोति सः कथयति

'यद्वृत्तः सन्ति राजानस्तद्वृता सन्ति वै प्रजाः (२।१०९ ६) अर्थात् यदि रामः स्वयमेव पित्रोराज्ञापालनं न कुर्यात्तु प्रजास्तमनुकरिष्यन्ति येन समाजेऽव्यवस्था भविष्यति पर्यावरणञ्च दोक्ष्यति। सम्भवतोऽस्मादेव कारणात् सीतायाः पवित्रतां जानताऽपि रामेण भरतलक्ष्मणशत्रुघ्नैःसह मंत्रयित्वा सीता त्यक्ता; यतोहि प्रजायाः सदाचरणाय नृपस्याचरणस्य शुद्धताऽनिवार्या वर्तते। श्रीमद्भगवद्गीतायां भगवता कृष्णेनापि कथितमासीत्—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥
(३।२१)

अतः श्रेष्ठो यदाचरति लोकस्तदनुवर्त्तते, लोको यदाचरति तदेवपर्यावरणं भवति, यदि पर्यावरणमेव प्रदुष्टं भवेत्तु शिशूनां छात्राणां वात्र को दोषः?, अस्मादेव कारणाद्भगवता श्रीकृष्णेन स्वयमपि स्वीकृतम्—

यदि ह्यहं न वर्तेयं जातुकर्मण्यतंद्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः (३।२३)

सम्भवतो गीताया एभिरेव बचनैः प्रेरणां प्राप्य राष्ट्रपित्रामहात्मागाँधिना कस्या अपि वृद्धायाः शिशोगुड़भक्षणप्रवृत्ति मोचयितुं प्रथमं तावत् स्वयमेव गुड़भक्षणप्रवृत्तिस्त्यक्ता। यतोहि स जानाति स्म यत् शिशुभ्यः कामपि वार्तां शिक्षणात् पूर्वमस्माभिर्मनोवचनकर्मभिस्तादृशमेव वर्तितव्यं यादृशं वयं शिशुभिरभिलषामः। अतः छात्रेषु दोषारोपणात्पूर्वं श्रेष्ठजनानां सिद्धान्तव्यवहारयोः पुनर्मूल्यांकनमावश्यकमस्ति। ते यद्वदन्तु तत्कुर्वन्त्वपि यथाकथितमस्ति—

विदुषां वचनाद् वाचः सहसा यान्ति नो वहिः ।
यातश्चेन् न परायन्ति द्विरदानां रदा इव ॥

किन्तु यदि कार्ये वचने च महदन्तरं भवेत् तदा ढपोलशंखस्य कथा वर्तमान परिप्रेक्ष्ये अक्षरशः सिद्धचति---

ददाति स्वर्णमुद्रां या सा गता पद्मशंखिनी ।
अहं ढपोलशंखोऽस्मि वदाम्येव ददामि न ॥

पुनश्चास्यैव पर्यावरणस्य शुद्धतायै श्रीमता-कौटल्यमहाभागेन जानानां तिस्त्रः श्रेणयः घोषिताः---

अधमा धनमिच्छन्ति धनंमानञ्च मध्यमाः ।

अत्र प्रश्नोऽयं जायते यत् सम्मानं किमस्ति ? किमुच्चपदप्राप्तिरेव सम्मानमस्ति ? यदि पदस्य प्रतिष्ठा पदासीनजनस्य कारणाद् वर्धते तु नूनमेव स जनः सम्मानवानस्ति ।

तस्य कृते पदस्य किमपि महत्त्वन्नास्ति, स यत्रापि गमिष्यति सम्मानितो भविष्यति, किन्तु यदि पदकारणाद् जनः सम्मानितो भवेत् त्ववश्यमेव सः पर्यावरणं दूषयति, पदाभावे तस्य किमपि महत्त्वं न भविष्यति, स यत्रापि गमिष्यति-प्रदूषणमेव प्रसारयिष्यति ।

अतः स्पष्टमिदं यत्कापि नीतिर्भवतु, कियती अपि सुन्दरतमा व्यवस्था भवतु, स्वस्थपर्यावरणं विना न कोऽपि लाभः । तस्यकृते अस्माकं नेतृभिः, समाजप्रमुखैश्च स्वाचारस्यादर्शो दर्शनीयः. पदाभिलाषां भौतिकजीवनञ्च विहाय सत्यमनसा समाजसेवा करणीया, अन्यथा चाक्श्यामपट्टाध्यापकान् विना विद्यालयेष्वध्ययनरतानां छात्राणां कृते सम्पूर्णाव्यवस्था राजस्थानस्य बालुकामयप्रदेशे सदाबहारनाम्नां वनानां कल्पनैव भविष्यतीति ध्रुवम् ।

[ लक्ष्मी प्रसाद नैथानी ]
प्रवक्ता-संस्कृत
रा० इ० का० श्रीनगर
पौड़ी गढवाल उ० प्र०

# आधुनिकभारत--निर्माणे संस्कृतमुपयुज्यते

छात्रः कामेश्वरशुक्लः
सार्वभौम संस्कृत प्रचार संस्थानतः

मान्याः, विषयस्यास्य गंभीरविवेचनायाः पूर्वमस्माभिः सर्वैरिदं विचारणीयं यत् कस्याऽपि देशस्य निर्माणं कदा भवति, तर्हि मया उच्यते यत् विभिन्नताप्रतिपादकतत्त्वानां यदा सर्वथा नाशः दौर्बल्यं वा भवति तदा जायते निर्माणं देशस्य । अतः प्रश्नः उदेति, यत् तेषां विभिन्नता प्रतिपादकतत्त्वानां नाशस्य किं साधनं, यच्च साधनं समग्रे राष्ट्रे बन्धुत्वविधायकम् ऐक्यस्य च प्रतिष्ठापकं स्यात्

तर्हि निःसन्देहमस्माकं समक्षमयं भावः आयाति जाग्रतोऽपि भवति यत् तत्साधनं संस्कृतमेव ।

अद्य आधुनिकभारतनिर्माणस्य बाधकं मुख्यं तत्वमस्ति पारस्परिकी घृणा । एकस्समृद्धो धनिको जनो धनहीन निम्नस्तरीयकार्यकर्तारं वा जनमतीव घृणया निम्नदृष्ट्या च पश्यति । अनेनोच्चनिम्न-वर्गजनेषु कदाचिदपि परस्परं समभावो बन्धुत्वञ्च न सम्भाव्यते तर्हि विचारयन्तु भवन्तोऽस्यां परिस्थितौ किमाधुनिकभारतस्य निर्माणं भवितुमर्हति ?, कथंचिदपि न ।

आधुनिक-भारतनिर्माणे बाधिकायाः अस्याः भावनायाः नाशस्य कृते संस्कृतभाषायाः वैदिके साहित्ये लौकिके साहित्ये च पर्याप्तसामग्री लभ्यते यथा उक्तमीशोपनिषदि--

"यस्तु सर्वाणि भूतानि आत्मन्येवानु पश्यति ।
सर्वभूतेषु चात्मानं ततो नो विजुगुप्सते ।"

अर्थात् यः प्राणी समस्तान् प्राणिनः आत्मवत् पश्यति सः कथंचिदपि घृणायाः उपेक्षायाश्च पात्रं न अवगच्छति । अनेनैक्यसूत्रेणाधुनिकभारतस्य निर्माणं सर्वथा सम्भाव्यते ।

अद्य देशेऽस्मिन् ईर्ष्यातत्वं बहुवर्द्धमानमवलोक्यते, एको मानवोऽन्यस्मै मानवाय क्रुध्यति ईर्ष्यति च । तथा च एको भ्राता ईर्ष्याविशात् स्वकीयं भ्रातरं हन्ति तर्हि यावत् कालमियं भावना अपगता न भवति तावदाधुनिकभारतस्य निर्माणं कथंचिदपि न सम्भाव्यते । अतोस्याः दुर्भावनायाः अपसारणाय अवलोक्यतामयं वैदिको मन्त्रः ।--

मा भ्राता भ्रातरं द्विक्षान् मा श्वसारमुतस्वसा ।
सम्यञ्चः संव्रता भूत्वा वाचं वदत भद्रया ॥

अर्थात्, एको भ्राता अन्येन भ्रात्रा सह द्वेषं मा कुर्यात् स्वसाऽपि अन्यथा स्वस्रा सह न कुर्यात् सर्वे भद्रया वाचा व्यवहरन्तु 'वसुधैव कुटुम्बकम्" एवं विधा भावना यावत् अद्यतने समाजे प्रतिष्ठिता प्रसृता च न भवति तावत् आधुनिकभारतस्य निर्माणमसम्भवमेव, अतः आधुनिकभारतस्य निर्माणाय सर्वथा उपयुज्यते संस्कृतम् ।

## इतिहासदृष्ट्या आधुनिकभारतस्य निर्माणम्:-

अन्यस्य कस्यापि देशस्य निर्माणाय सा एव भाषा अस्माक मैतिहासिकैः स्वीकृता, यस्यां तद् देशीयाः संस्कृतिः सभ्यता च निबद्धा आसीत् । यथा इज-राइल देशीयैः स्वपूर्वजानां स्व धर्मस्य स्व संस्कृतेश्च प्राचीना "हिब्रू" भाषा स्वदेशनिर्माणाय स्वीकृता तथा तत्र अनयैव भाषया तस्य देशस्य निर्माणं जातम् । एवमेव चीनदेशीयरपि अन्यासु उपस्थितासु सतीषु सांस्कृतिकैक्य-कठिनाऽतिकठिना लिपिः स्वदेशनिर्माणाय स्वीकृता । अतः वक्तुं शक्यते यत् यस्यां भाषायां यस्य देशस्य संस्कृतिः सभ्यता च मूलरूपेण निबद्धा, सा एव भाषा देशनिर्माणे समर्था ।

अतः भारतराष्ट्रस्य प्रतिपादिका संस्कृतभाषा एव आधुनिकभारतगिर्माणे समर्था, नान्या अतएव उक्तमस्ति केनापि कविना स्व कवितायां यत् –

'देववाणीके उदयसे देशका कल्याण होगा
राष्ट्रका फिरसे हमारे दिव्य नव निर्माण होगा ।'

किं बहुना--विना वेदं, विना गीतां, विना रामायणीं कथाम्,
विना कविं कालिदासं भारतं भारतं नहि ।

अतः इदमेवोद्घोष्योच्यते मया तारस्वरेण यत् आधुनिक भारत-निर्माणे संस्कृतमुपयुज्यते एव इत्यत्र नास्ति कश्चन संदेहलेशः ।

# "संस्कृतशिक्षणस्य सरलतमो विधिः"

हरिपति सहायः कौशिकः
व्या. शास्त्री, एम० ए०

## १ —संस्कृतप्रचारस्य सर्वतोमुखी चर्चा—

अयं महतः सौभाग्यस्य विषयोऽस्ति, यदद्य अनेक वर्षान्ते देशे संस्कृतस्य सर्वतोमुखी चर्चा प्रचलिता वर्तते। अद्यतः कतिपयेभ्यश्चिदेव वर्षेभ्यः पूर्वं देशवासिनां हृदये संस्कृतस्य सम्बन्धे या धारणाऽऽसीत् सा बहुशोचनीया ऽऽसीत्। पराधीनतायाः पाश्चात्यशिक्षा-याश्च दूषित-प्रभावस्य कारणेन कांश्चनां-गुलिगणनीयान् दूरदर्शिमनीषिण कांश्चन ब्राह्मणा-श्च परित्यज्य अवशिष्टे समस्ते साधारणे जनसमूहे संस्कृतशिक्षां प्रति महदुपेक्षायाः भावः समागतः आसीत्। बहुभिः जनैः तु एषा, मृतभाषा तथा जीवनाय सर्वथा अनुपयोगिनी अतएव हेयरूपेणापि स्वीकृताऽऽसीत् तस्मिन् समये नवीनस्य शिक्षित-समाजस्य समक्षं संस्कृत प्रचारस्य चर्चां कर्तुं बहु साहसमपेक्षितमासीत्। अहं स्वयमेवैतदनुभवामि यत् स्वकीयेतु संस्कृत-प्रचारस्यारम्भिकेषु दिनेषु मया सुशिक्षितैः जनैः संस्कृतस्योपादेयतां साधयितुं कियान् विवादः करणीयो भवति स्म, परन्तु अद्यतनी स्थितिः तादृशी नास्ति। इतः यस्मात् कालात् देशस्य बौद्धिकं धरातलं मानसिकदासतायाः तद्विशालसाहित्यस्य, तस्मिन् प्रतिपादितायाः संस्कृति-सभ्यतयोः महत्तायाश्च मूल्यांकनं स्वतन्त्र-दृष्टया क्रियमाणमभवत् तस्मात् कालाद् उपर्युक्ता धारणा सर्वथा परिवर्तिता। सर्वे विवेकशीलाः जनाः संस्कृतस्य पठन-पाठनयो उपयोगितायाः तत्-प्रचारस्यावश्यकतायाश्च समर्थनं कुर्वाणाः सन्ति। एतदेव कारणमस्ति यत् समयेऽस्मिन् केन्द्रीयाः प्रदेशीयाश्च सर्वकाराः विश्व संस्कृत-परिषदादयः अनेकाः संस्थाः, सर्वे शीर्षस्थाः मनी-षिणः नेतारश्च तथा बहवः संस्कृतानुरागिणो भद्र-पुरुषाः संस्कृतशिक्षायाः उन्नयने रताः वर्तन्ते। उत्तर-प्रदेशीय सर्वकारेण तु वाराणस्यां संस्कृत-विश्वविद्यालयस्यैव स्थापना कृतास्ति। इत्थ-म्बास्यां दिशि एकस्य महतः प्रभावकारिणः कार्यस्य प्रारम्भः जातोऽस्ति। बिहारप्रदेशस्य चिर-प्रसिद्धे विद्यापीठे मिथिलायाः दरभंगानगरे एकः संस्कृतविश्वविद्यालयः कतिपयेभ्यश्चिद्वर्षेभ्यः प्रचलितो वर्तते। एवं विधा चर्चा राजस्थाने दक्षिणभारते चापि प्रचालिताऽस्ति। गतवर्षेषु संस्कृतस्य केभ्यश्चन विख्यातेभ्यः वयोवृद्धविद्वद्भ्यः केन्द्रतः आजीवनवृत्तिं दातुं यः शुभारंभोऽभवत् सोऽपि अस्यां दिशि एकम् अत्यन्तमुत्साहवर्द्धकम् आयोजनमस्ति।

## २—तथा सर्वसामान्य-संस्कृतशिक्षणं प्रति अनुत्साहः, अस्य च कारणम्—

परन्तु, एतत्सर्वं भवदपि सर्वसाधरणे शिक्षित-समाजे संस्कृतपठनस्य यथाऽभिरुचिः अपेक्ष्यते तथा

न वर्तते । तस्य प्रधानं कारणमेतदेव वर्तते यत्जनः संस्कृताध्ययनमेकं बहुविकटं कार्यं मनुते । सर्व सामान्ये बहुदिनेभ्यः एषा धारणा बद्धमूला जाता वर्तते यत् संस्कृतभाषा एकाऽत्यन्तं क्लिष्टा भाषा वर्तते तथा अस्मादेव कारणात् इमां भाषां शिक्षितुं अस्याञ्च भाषणस्य बोधनस्य तथा लेखनस्य पठनस्य साधारणयोग्यताप्राप्तिरपि सहजं कार्यं नास्ति । अतः संस्कृताध्ययनस्य उपयोगितां बुध्यमानः संस्कृतं शिक्षितुमुत्कटेच्छां कुर्वन्नपि च अधिकांशतः जनः संस्कृताध्ययनं प्रति प्रवृत्तो न भवति । अद्य या संस्कृतप्रचारे सर्वतोऽधिका बाधा वर्तते साऽस्ति तस्याः कठिनतायाः हृदये विराजमाना आशंका एव ।

## २ --संस्कृतस्य कठिनता-एका किम्वदन्ती--

परन्तु, यथाऽग्रे अस्यां पुस्तिकायां बोधयिष्यते यत् एषा आशंका सर्वथा निराधारा, अस्याश्च एकमात्रं कारणं, परम्परा-गत किम्वदन्ती तथा किञ्चित् अस्य वर्तमानायाः पठन-पाठनयोः पद्धतेः जटिलता । यदि कोऽपि बुद्धिमान् जनः अस्याः धारणायाः भयस्य च निराधारतां बोध्येत, सः संस्कृतस्य सरलतायाः रहस्यं ज्ञाप्येत, संस्कृत-शिक्षणस्य सुगमानि साधनानि प्रस्तूयेरन् तथा समुचितरूपेण शिक्षाप्रदीयेत तर्हि कश्चिदपि पुरुषः केवलं द्वयोः मासयोः संस्कृतस्य अपेक्षितं ज्ञानं प्राप्तुं शक्नोति । शनैः शनैश्च स्वयमेवाध्ययनं कुर्वन् अस्य सुयोग्यः विद्वान् भवितुं सौभाग्यं प्राप्तुं शक्नोति ।

चूडान्तं ज्ञानं प्राप्तुं कतिपयानि वर्षाणि अपि व्यतीतानि भवितु मर्हन्ति, यत्र सामान्यज्ञानस्य च प्राप्तेः अर्थात् सामान्यतया संस्कृत भाषणस्य च टीकायाः साहाय्येन तस्य काव्यसाहित्यपुराणानामध्ययनस्य प्रारम्भिकक्षमतायाः वार्ता विद्यते तर्हि एतत्कृते मासद्वयस्य समयः पर्याप्तोऽस्ति अनयोः मासयोः षष्ठिदिनानां चत्वारिंशदधिकचतुर्दश शतस्य होराणां समुचितरूपेण उपयोगः क्रियेत तदा पाठकाः साश्चर्यं द्रक्ष्यन्ति यज्जनः यदसाध्यं मत्वा त्यक्तवानासीत्, तत्कियत् सुगमं सरलञ्च वर्तते तथा कश्चिदपि विशिष्टं प्रयासं बिना मनोरंजनेन सह केनोपायेन अत्यल्पसमये तस्योपरि अधिकारं कर्तुं शक्नोति । एकमासस्य परिश्रमान्ते पूर्णं संस्कृतस्य ज्ञानं दृश्यते यस्य केनापि कदापि कल्पनाऽपि न कृता भविष्यति ।

सार्वभौम सं० प्र० संस्थानम्
वाराणसी

---

विशेषः—"सार्वभौम संस्कृतप्रचारसंस्थानम्" द्वारा "दोमास में संस्कृत" नामकं हिन्दी–लघु-पुस्तकं प्रकाशितं । तस्यैव सरलः भावानुवादः, क्रमशः प्रस्तूयतेऽत्र ।

# राम--राज्यं भवेत् !

रच०---रामस्वरूप शास्त्री अमरः,
तालबेहट ( ललितपुर ) उ० प्र०

मेधया मण्डितैः संस्कृतौ संस्कृतैः,
प्रज्ञया पण्डितैः कर्मभिर्दण्डितैः।
तृष्णया खण्डितै र्नो, जनैर्वन्दितैः,
साधुभि र्भारते रामराज्यं भवेत् ॥ १ ॥

सूनवः शीलवन्तो भवेयुः सुताः,
जन्मदातुः पितुस्तर्पणे तत्पराः।
स्वामिनः सत्प्रियाभिश्च सन्तर्पिताः,
राम-राज्यं भवेद् भा-रते भारते ॥ २ ॥

धर्मवृद्धिः समृद्धि र्भवेत्त्यागिनां,
सज्जनानां जनानां च सिद्धिः स्वतः।
स्वगेहे प्रतिष्ठा जनन्या यदा ?
रामराज्यं कथं नो भवेद् भारते ॥ ३ ॥

सर्वथोपेक्षिता संस्कृतिः संस्कृतं ;
संस्कृतज्ञा विपन्नाः सुधावर्षिणः।
शासकास्त्रासकाः स्वार्थिनो मन्त्रिणो ;
रामराज्यं भवेद् भारतेऽस्मिंस्तदा ? ॥ ४ ॥

पण्डिता मण्डिता धर्म-धान्यै र्धनैः,
पालिता वर्द्धिता वन्दिता नन्दिताः।
तर्पिता स्युः स्वगेहे च स्नेहेरता ;
रामराज्यं कथं नो भवेद् भारते ? ॥ ५ ॥

पुत्रलोका न शोकप्रदाः सन्ततिः,
सत्यनिष्ठा सुशीला स्नुषा शारदा।
सर्व-दा सार-दाऽऽध्यात्मविद्या भवेद्,
रामराज्यं स्वयं सम्भवेद् भारते ॥ ६ ॥

भ्रातरो राम तुल्याश्च स्युस्त्यागिनः,
प्रेयसी सत्प्रिया जानकी जी यथा।
सत्पिता स्याद्धरिश्चन्द्रवत्पावनश्,
चोच्छ्रिता भावना रामराज्यं तदा ॥ ७ ॥

स्वानुजा लक्ष्मणाः शासकः स्याच्छिविः ;
सन्त-शुद्धो दधीचिर्दयालु र्भवेत्।
विश्वबन्धुत्व-भावश्च सम्वर्द्धितो ;
रामराज्यं भवेद् भा-रते भारते ॥ ८ ॥

भारतीया जनाः स्यु र्न सम्पीडिताः,
कौरवा व्रीडिता, नैव स्युः पाण्डवाः।
मानिनो मन्त्रिणो धर्मिणो ज्ञानिनो,
रामराज्यं भवेद् भारते भा-रते ॥ ९ ॥

गो-रसं गो-कुलं भव्यगेहं गुणै--
र्गेहगेहे भवेज्ज्ञानचर्चा प्रभो !।
पूजनीयस्य च स्यात्समर्चा शुभा ;
रामराज्यं भवेद् भा-रते भारते ॥ १० ॥

जातिवाद स्तथा पक्षपातो न वा ;
स्यात्सुमित्रा स्वमाता समा पोषिका।
सन्तु सुग्रीव-सौम्या न विद्वेषिणो,
रामराज्यं भवेद् भारते भारते ॥ ११ ॥

# सूक्तयः

### १. लौहपथगामिनी

जननि लौहपथगामिनि मातः
भुवने तव विग्रहोऽवदातः।
तव कृपयैव दरिद्रो धनिकः
सृति वैक्लव्यान्नूनं त्रातः !!
उत्सङ्गे तव मातर्निभृतं
स्वपिति सुखं जननिवहोऽविरतम्।
त्वं धावसि तिष्ठन्ति च पथिकाः
समास्त्वत्कृते दीना धनिकाः !!

### २. चन्द्रः

क्व साम्प्रतं ते तरुणीमुखोपमा
क्व चामृताम्भोधिसमुत्थगौरवम्।
अयेऽन्तरिक्षाध्वगपादधर्षित !
विधो ! तवाधः सुषमा गताऽखिला॥
शशो न चैणो न नभोऽवभासनं
न चापि गोविन्दशरीर-धर्षिता।
अये हिमांशो ! स्फुटितन्नु भाण्डकं
कलंकलेखा तव पार्वती शिला॥

### ३. पुष्पम्

दलानि नष्टानि वयोविपाकात्
शाखावियोगोऽपि चिरं विसोढः।
तथापि किं तेन यदद्य पुष्प !
विवर्धतेऽनेहसि ते, सुगन्धः॥
विनाशमेत्यापि यशःप्रकर्षं
नित्यं समाप्नोषि कथाप्रसंगैः।
त्वमेव, सञ्जीवसि भूमितल्पे
प्रसून ! नान्ये गृहकार्यलीनाः॥

### ४. चातकः

निशीथकाले जगतां प्रवाहे
दृढं निरुद्धऽपि निरुद्धकण्ठः।
प्रियं विचिन्वन् कमिह प्रमुग्धं
विलासिनां विप्रियमातनोषि !! -
निरन्तरं पीहु पिहु' प्रकामं
उच्चैः रटन् चातक ! यद् विभासि
स्यात्तेन सिद्धिस्तव काप्यभीष्टा
न वाऽथवा किन्तु परं व्रतन्ते॥
रामोऽपि सम्प्राप विलीनसीतां
दमस्वसा चापि नलं ववार।
क्व ते प्रिया गूढतरं निलीना
शृणोति नो चातक ! रोदनन्ते॥

### ५. रूप्यकम्

जननी जनको न सुता न सुतः
गृहिणी न सखा न च बन्धुजनः
न गुरुर्न च शिष्य इह प्रथिताम्
अयि रूप्यक ! ते समतां भजते !!
उपलब्धिरहो तव किन्न पदं
विभवं सुयशः प्रददाति सुखम्
शशिशोभनरूप ! सुभूप ! भवे
प्रभवत्यनिशं तव चारुवपु; !!

॥ श्रीः ॥

# व्रजगीतिः

डॉ० वासुदेवकृष्ण चतुर्वेदी
[ गतश्रमटीला, मथुरा उ० प्र० ]

कलि-कल्मष-पुञ्ज विनाशकरं,
बहु जन्म पवित्र प्रकाशकरम्।
व्रज, सद्व्रज मञ्जु निकुञ्ज गृहं ;
यदि चेच्छसि जन्म निजं सफलम् ॥१॥

रस – रास – विलास परं रमणं,
सुखदं जन – तापहरं विमलम्।
व्रज शेष - महेश - मुनीन्द्रनुतं,
यदि चेच्छसि जन्म निजं सफलम्। २॥

तुलसीदल – गन्ध – धृतं निखिलं,
व्रजराज कुलार्चित – धेनुभरम्।
व्रज कंस निषूदन – पुण्यवनं,
यदि चेच्छसि जन्म निजं सफलम् ॥ ३॥

यमराज पितुस्तनया यमुना,
सुविराजति यत्र मनः कमना।
व्रज, नित्यकिशोर – कथा–कलितं,
यदि चेच्छसि जन्म निजं सफलम्। ४॥

मुरली निनदैर्गृहमध्यलसत्,
तरुणीजन - विस्मृत - देहदशम्।
व्रज, रास रसेश्वर - रासगृहं,
यदि चेच्छसि जन्म निजं सफलम् ॥५॥

'हरिनाम' वचोऽमृतपानपरैः,
शुक – हंस-मयूर-खगैश्च युतम्।
व्रज, कृष्ण - परायण भूमितलं,
यदि चेच्छसि जन्म निजं सफलम्। ६

व्रजवल्लभ – कीर्तन – धन्य - धरं,
सफलं भवति व्रजपुण्यचयम्।
व्रज, केशव–केलि – कलाप – कलं,
यदि चेच्छसि जन्म निजं सफलम् ७।

बदरीवनमत्र कुशस्थलकं,
जगदीशपुरी शिवधामपरम्।
व्रज, धाम चतुष्टय पूर्तिकरं,
यदि चेच्छसि जन्म निजं सफलम्। ८।

# नैतिक-शिक्षा कुतः प्रारभते ?


## डॉ० राम प्रताप तिवारी

उपाचार्य एवम् अध्यक्षः संस्कृत विभागे गढ़वालविश्वविद्यालये, श्रीनगरे गढ़वाल उ० प्र०


( राकेशः श्वानं ताडयति )

पिता—राकेश ! कथं श्वानं ताडयसि ?

राकेशः - भवताऽपि ह्यः कथं श्वा ताडितः ? अहमपि भवन्तमनुसरामि ।

( ततः प्रविशति भिक्षुकः )

भिक्षुकः—बुभुक्षितोऽस्मि । देहि मे भिक्षाम् ।

राकेश-पिता--गच्छेतः । बहवो याचका अत्रागच्छन्ति । सबलो दृश्यसे, कथं न किञ्चित् कार्यं करोषि ?

भिक्षुकः--किं भिक्षा-याचने परिश्रमो न जायते ? न विना परिश्रमेण किमपि कार्यं सिद्ध्यति ।

राकेश-पिता-दशपणकं कञ्चुकस्य पुटान्निसार्य भिक्षुकस्य शिरसि प्रक्षिप्तवान् ।

(पणकाघातेन कष्टमनुभवन् भिक्षुको निर्गतः)

( अपरेद्युः सन्यासिनं दृष्ट्वा राकेशः तस्योपरि पाषाणखण्डान् क्षिपति )

राकेशपिता - तस्योपरि कथं पाषाणखण्डान् प्रक्षिपसि ?

राकेशः--पितः ! ह्यः भवताऽपि दशपणकं भिक्षुकस्योपरि क्षिप्तम् ।

राकेश-पितामहः - वत्स ! पिपासया पीडितोऽस्मि । देहि मे सजलकंसम् । तदनन्तरं च चायचषकमपि ।

राकेश-पिता-उत्थाय कथं न जलं पासि ? राकेश ! देहि तं वृद्धं सजलकंसम् । अनेन वृद्धेन परिश्रान्तोऽस्मि ।

राकेशः - नाऽनेष्यामि ।

राकेश--पिता-कथं नाऽनेष्यसि अहं त्वां ताडयामि ।

राकेशः - कथं ताडयिष्यसि ?

राकेशः- अयं वृद्धश्च कस्य जनकः ? किमयं न तव जनकः ? भवान्तु तस्याज्ञां न पालयति । अयं कथं न त्वां ताडयति ? नाहमानेष्यामि जलम् ।

वृद्धः - अलमलम् वाद विवादेन । अहं स्वयं जलं गृहीष्यामि ।

राकेशपिता-राकेश ! वृद्धः पत्रस्थालिकासु खादतु । त्वं पत्रनिर्मितस्थालिकाम् आनय । उच्छिष्टे सति इमामवस्करस्थानेऽपनेष्यसि ।

( राकेशः प्रतिदिनं पत्रनिर्मितां पितामहेनोच्छिष्टांस्थालिकां गृहस्यैकस्मिन् कोणे प्रक्षिपति )

( विद्यालयतः राकेशस्य सखा सुरेश आगतः )

सुरेशः—नमस्ते पितामह ! नमस्ते पितृव्य ! नमस्ते पितृव्ये ।

वृद्धः—नमस्ते पुत्र ! कोऽसि ? मम पुत्र-पौत्राश्च न कदापि मां नमस्कुर्वन्ति ।

गुरुजनानामाचरणानि दृष्ट्वा बालका आचरन्ति । यतो हि—

याहशौ पितरौ यस्य, पुत्रो भवति ताहशः।
याहशं भवनं यस्य, कपाटो याति ताहशः॥

सुरेशः-पितामह ! अहं पण्डितस्य श्रीगिरिधारी लालस्य पुत्रोऽस्मि।

वृद्धः—तस्य गुणैरलङ्कृतोऽसि। चिरञ्जीव। वर्धस्व।

सुरेशः-( इतस्ततः पश्यन् ) किमयमवस्कराऽलयः ?

राकेशः--नहि।

सुरेशः-- कथमत्रोच्छिष्टपत्रस्थालिका निक्षिप्ताः ?

राकेशः--किं तव पितामहः पत्रस्थालिकासु न खादति ?

सुरेशः--नैव। किं तव पितामहेनोच्छिष्टा एताः पत्रस्थालिकाः ?

राकेशः -आम्। अहं तव गृहं गत्वा पश्यामि यत् तव पितामहः कस्यां स्थालिकायां खादति ?

( सुरेश-राकेशौ तत्र गतौ )

( सुरेशः-गृहं प्रविश्य ) पितामहस्य, मातुः पितुश्च चरणान् स्पृशति )

राकेशः--कथमेतेषां चरणान् स्पृशसि ?

सुरेशः--गुरुजनानामतिथीनाञ्च सम्मानार्थं सर्वस्मिन् विनयलाभार्थमेवैतेषां चरणान् स्पृशेत्।

राकेशः -मम पिताऽहं च न कदापि पितामहस्य चरणस्पर्शं कुर्वः।

सुरेशः--यदि परेभ्यः सम्मानमपेक्षसे तदा परेषां सम्मानं कुरु।

सुरेशपिता-पितः ! भोजनं सम्पादितम्। उत्तिष्ठतु भवान्। अहं भवतो हस्तपादं प्रक्षालितुं जलं नीत्वाऽऽगतोऽस्मि।

( सुरेशपिता तस्य हस्तपादं प्रक्षालयति )

सुरेश;- पितामह ! एषा भोजनेन सज्जा स्थालिका, एषश्च सजलकंसः।

( राकेशः वृद्धं प्रति कृताचरणमवलोकयति )

सुरेशः -दृष्टं भवता ? मम पितामहः कथमश्नाति।

राकेशः--आम् ! दृष्टम्। अहमपि एवमेव करिष्यामि।

( राकेशः स्वगृहं गच्छति पितामहस्य चरणयोः पतित्वा प्रणमति )

( वृद्धः आशीर्वादं ददाति )

( सः सुरेशः पितुराज्ञामनुल्लंध्य पत्रस्थालिकायां सम्मानपूर्वकं वृद्धाय भोजनं ददाति। उच्छिष्टश्च स्थालिकां गृहस्यैकस्मिन् कोणे प्रक्षिपति प्रतिदिनम्। राकेश-पित्रा एकस्मिन् दिने तदवस्करो दृष्टः )

राकेशपिता-राकेश ! कथमत्रायमवस्करः ?

राकेशः—पितः ! या स्थालिका भवता स्वजनकस्य कृते प्रयुज्यतेऽहमपि तुभ्यं तस्यामेव भोजनं दास्यामीति विचिन्त्य एता मया सङ्गृहीताः। यथा स तव पिता, एवमेव त्वं मम पिता। कुलपरम्परा न छेतव्या।

राकेशपिता--वत्स ! त्वया ममाज्ञानान्धीकृते लोचने उद्घाटिते। नाहं स्वपित्रा सहाभद्रमाचरिष्यामि।

राकेशः - पितः। सुरेशस्य गृहे वयोवृद्धानामतिथीनाञ्च पूजा भवति : अस्माभिरपि परिचिताऽपरिचितेषु समभावेन व्यवहर्तव्यम्। पशुषु दया कर्तव्या।

सत्यं वक्तव्यम् । पिशुननिन्दे न कर्तव्ये । सर्वेषु भ्रातृवद्व्यवहर्तव्यम् ।

एतानि वाक्यानि मद्गुरुभिरप्युपदिष्टानि ।

पिता– वत्स । चिरञ्जीव ! त्वया बोधितोऽस्मि । अल्पवयसाऽपि त्वयाऽह्युपदिष्टोस्मि न गुणः लिङ्गवयोऽपेक्षते ।

राकेशः--पितः ! भगवद्भजनमपि अस्माभिः कर्तव्यम् ।

पिता—एवं भवतु ।

# वेदे इन्द्रविषयिणी अनास्था

डॉ० शैलजा पाण्डेय

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ चन्द्रशेखर आजाद पार्क. इलाहाबाद ।

वैदिकदेवः इन्द्रः देवेषु मध्ये सर्वाधिक्येन स्तुतः अत्यन्तः शक्तिमान् वर्तते । आकृतिदृष्ट्यापि अन्य-देवापेक्षया सः स्पष्टतरः वर्तते । किन्तु अस्य चरित्रस्य इयं विलक्षणता यत् संहितासु यत्र सः बहुस्तुतः तत्रैव सर्वाधिकसन्देहोऽपि विषयेऽस्मिन्वर्तते । स्तोता पृच्छति यत् कुत्रास्ति इन्द्रः ? कोऽस्य मित्रम् ?--'कुह श्रुत इन्द्रः कस्मिन्नद्य जने मित्रो न श्रूयते । ऋषीणां वा यः क्षये गुहा वा चकृषे गिरा ॥'

ऋग्वेद, १०।२२।१

इन्द्रस्य सत्तां प्रति सन्देहस्य स्फुटरूपेण वर्णनम् ऋग्वेदस्य द्वितीयमण्डले वर्तते--''यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषोअस्तीत्येनम् ।'

ऋग्वेद, २।१२।४

एकस्मिन्मन्त्रे इदमपि कथितं यत् इन्द्रः केन दृष्टः--

'क्व स्य वीरः को अपश्यदिन्द्रम्……'

ऋग्वेद-५।३०।१।

अस्य वीरत्वपूर्णकृत्यं प्रति सन्देहो वर्तते-- किं वेदवर्णितानि वीरकर्माणि इन्द्रस्यैव--

'अस्ति स्विन्नु वीर्यं तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः ।' ऋग्वेद ६।१८।३।

अन्यत्र ऋषिः वक्ति यत् इन्द्रस्या स्तित्वमेव नास्ति तर्हि कस्य स्तुतिः भवेत्--

'नेन्द्रो अस्तीति नेम उत्व आह क ईं ददर्श कमभिष्टवाम' ।

ऋग्वेद, ८।१००।३।

अत्र प्रश्नः भवति यत् इन्द्रः ऋग्वेदे सर्वाधिकः स्तुत्यः सर्वदेवेषु बलिष्ठः, दानवीरः शूरः, स्तोतुः रक्षकः, स्तोतुः शत्रुः तस्यापि शत्रुः, तर्हि कस्मात्' कारणात् स्तोता इन्द्रं प्रति आस्थावान् नास्ति । सम्भवतः इन्द्रस्य चारित्रिकदौर्बल्यम् तं प्रति

अनास्थां जनयति। के ते दोषाः? ऋग्वेदस्य चतुर्थमण्डले इन्द्रः पितृहन्तारूपेण वर्णितः--

'कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरन्तम् कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणः पितरं पादगृह्य ॥'

ऋग्वेद, ४।१८।१२।

इन्द्रः स्वपितुः पादौ गृहीत्वा तस्य वधं कृतवान् एवं मातरं विधवां कृतवान्। इन्द्रस्य पितृवधविषयिणीक्रियायाः अनेकाः व्याख्याः पाश्चात्यविद्वद्भिः जाताः। डोनाल्डमेकेंजीमहोदयानुसारेण इन्द्रेण पितृवधः तत्प्रवृत्याः उदाहरणमस्ति यया प्रेरितः महत्त्वाकांक्षी शूरः पुत्रः तेजस्वन्तं पितरं स्थानभ्रष्टं कृत्वा स्वयं तस्य स्थानं गृह्णाति। इन्द्रोऽपि तथा करोति।[1] अन्यविचारकेण मैक्डॉनलमहोदयानुसारेण इन्द्रेण कृतं त्वष्टावधमत्र वर्णितम्।[2] इदमपि मतं वर्तते भारोपीयदेवपरिवारे द्यौः पितृभावेन प्रामुख्येन वर्णितः, यस्य स्थानच्युतिः कालान्तरेण इन्द्रेण भवति। वैदिकसाहित्ये इन्द्रः क्रमशः प्रमुखः जातः द्यौः इन्द्रापेक्षया न्यूनः जातः।

वेदार्थज्ञानाय वेदभाष्यकर्ताविङ्कटमाधवमहाभागेनास्मिन्मन्त्रे टिप्पणी कृता--'जातः सन्निन्द्रो दक्षिणाया गोर्योनिमनुमृश्याच्छिनत्। यदा च पितरं क्रोधात् पादेषु गृहीत्वा परिभ्रमय्य देशान्तरे प्राहिणोत्'

पितृवधातिरिक्तं इन्द्रोपरि अपरोप्यारोपः ब्रह्महत्यायाः भवति। ऋग्वेदेऽयमारोपः स्पष्टरूपेण नास्ति तथापि एकमन्त्रस्य भाष्ये आचार्यसायणः लिखति यत् वृत्रवधानन्तरम इन्द्रः ब्रह्महत्यायाः पापभाक् सञ्जातः। जलस्य फेनानि एवमिन्द्रस्य पापप्रतीकः--

'किमु ष्विदस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः। मयैतान्पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिन्धून्।'

ऋग्वेद, ४।१८।६।

(सायणभाष्यः द्रष्टव्यः)

इदं प्रतीयते यत् इन्द्रेण कृतः शत्रुसंहारः तस्य प्रशंसायाः निन्दायाश्चोभयोः कारणं सञ्जातम्।

लोकजीवनस्य संत्रस्तकर्तुः वृत्रस्य, शुष्णस्य, बलादिकस्य दुर्दान्तशत्रुजनस्य संहारः एकतः तु जनमानसे सन्तोषप्रदः जातः, अपरतः भयोत्पादकोऽपि जातः,

'बिभया हि त्वावत उग्रवादभिप्रभंगिणः तस्मादहमृतीषहः।'

ऋग्वेद, ८।४५।३५।

पराक्रमदानादिकृत्येणोपकृतः जनः प्रकटरूपेण तु तस्य गुणानुवादमेव करोति किन्तु चरित्रगतदोषात्तु इन्द्रविरोधोभावोऽपि यत्र तत्र प्रकटी भवति।

इन्द्रस्य अन्यत् चारित्रिकदौर्बल्यम् असंयतकामभावः वर्तते। कामलिप्सायाः पुराणे बहुशः उल्लेखः वर्तते किन्तु वेदे तस्याः अभावः नास्ति। अहल्यायाः कथा रामायणे वर्णितास्ति। इयं कथा इन्द्रस्य कामदुर्बलतायाः सुस्पष्टमुदाहरणं वर्तते। वैदिक-

१--मेकेंजी डोनालड, इन्डियन मिथ्स एण्ड लीजेन्ड्स, पृ० १५८।

२--मैक्डॉनल, वैदिक माइथॉलॉजी पृ० १०६।

साहित्ये अस्य निर्देशः वर्तते। शतपथ ब्राह्मणे ( ३।३।४।१२ )

'अहल्यायै जार.' षडविंशब्राह्मणे ( १।१ )

'अहल्यायाः ह मैत्रैय्याः ( इन्द्रः ) जार आस' तस्याः कथायाः बीजं वर्तते। दीर्घजिह्व्या दानव्याः उल्लेखः जैमिनीय ब्राह्मणे ( १।१६१।२ ) वर्तत्ते। सा यज्ञेषु इन्द्रस्य भागधेयसोमस्य पानं करोति स्म। तस्याः प्रतिपर्वं योनिरासीत्। इन्द्रः स्वमित्रेण कौत्ससाहाय्येन तां काममोहितां कृत्वा तस्याः वधं चकार। अस्मिन्प्रसङ्गेऽपि इन्द्रस्य कामदौर्बल्यः प्रतिभाति।

इन्द्राण्याः सपत्नीमर्दनाय ओषधिखननम् इन्द्रस्य बहुस्त्रीगमनं सङ्केतयति—

'इमां खनाम्योषधिं वीरुधं बलवत्तमाम्।
यया सपत्नी बाधते यया संविदन्ते पतिम्॥'

ऋग्वेद, १०।१४५।१।

काठकसंहितायामिन्द्रस्य कामसम्बन्धः विलिस्तेगादानव्या सह उल्लिखितम्। सः तस्यामासक्तः आसीत्—

'इन्द्रो वै विलिस्तेंगा दानवीमकामयत। सोऽसुरेष्वचरत् स्त्र्येव स्त्रीष्वभवत् पुमान्-पुंसु।'

काठकसंहिता-१३।५।

इन्द्रस्य कामसम्बन्धः अपालया सहापि प्रतिभाति। ऋग्वेदस्य ८।९१ सूक्तस्य सायणभाष्ये इदं वर्णितम्। अपाला स्पष्टतया वक्ति—

'कुवित्पतिद्विषो यतीरिन्द्रेण संगमामहै।'

ऋग्वेद, ८।९१।४।

सम्भवतः इमानि एव कारणानि यानि इन्द्रं प्रति अनास्था जनयन्ति। देवाः अपि अस्य परित्यागं कृतवन्तः— 'उत माता महिषमन्ववेनदयी त्वा जहति पुत्र देवाः' ( ऋग्वेद-४।१८।११ )।

किन्तु जरिता इन्द्रं प्रति आस्थावान् अस्ति—
'इह श्रुत इन्द्र अस्मे अद्य स्तवे वज्यृचीषमः।
मित्रो न या जनेष्वा यशश्चक्रे असाम्पा॥'

ऋग्वेद—१०।२२।२।

इन्द्रः स्वयं कथयति—

'अयमस्मि जरितः पश्य मेह
विश्वा जाताम्यभ्यस्मिमह्ना।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो
भुवना दर्दरीमि॥'

ऋग्वेद, ८।१००।४।

# संस्कृतम् आंगलभाषा च

डॉ० सुरेन्द्र अज्ञात

भारतीयपुनर्जागरणकालतो भारतेऽस्मिन् संस्कृतस्य सर्वभाषाजननीत्वमुद्घोष्यते सर्वैः। परमर्वाचीन-भाषामिज्ञानानुसन्धानैरस्य विचारस्य प्रतिवादः क्रियते, कथ्यते च—भारोपीयपरिवारस्य (Indo-European Family of languages) संस्कृतं प्रचीनतमा भाषा। अस्य भारोपीयपरिवारस्य बह्व्यो भाषास्सन्ति। आधुनिकांगलभाषाया जनन्यः लैटिन-ग्रीक-प्रभृतयो भाषा

अप्यस्मिन्नतर्भूंताः। अस्य बृहत्तमभाषापरिवारस्य मूलभूता काचित् युरस्प्रेच ( Ursprach ) इति नामिका' भाषा भाषाविज्ञानधुरंधरैः कल्पिताऽस्ति यस्या विभिन्नाः भाषा उद्भूताः। संस्कृतं-फारसी-प्राचीनेरानी-लैटिन-ग्रीक-आंगल प्रभृतय प्रमुखा भाषा कल्पिताया आदिभाषाया एव पुत्री भूतास्सन्तीति सोदाहरणञ्च प्रतिपादितं तै ।

इतः कानिचित् वर्षाणि प्रागस्य तस्य नामापि नासीत्। परमधुनाऽस्यैव सर्वत्र प्रचारो भाषा-विज्ञानक्षेत्रे। अस्यायुः कियत् कोपि दैवज्ञ एव जानातु, यदि स ज्ञातुं समर्थोऽस्ति। तदूर्ध्वञ्च कस्य मतस्य साम्राज्यं भविष्यतीत्यपि भविष्य-द्गर्भलीनम्।

परमधस्ताच्छब्दतुलनया संस्कृतांगलयोर्नैकटच-प्रकाशनाय प्रयत्यते, येनेदन्तु सिद्धं भविष्यत्येवा-शरतो यद् संस्कृतं यदि आंगलभाषाया मातुर्माता नास्ति. तस्या स्वसा त्वस्त्येव,

( क ) केचिच्छब्दा य उभयत्रसमानोच्चारणा समानार्थकाश्च सन्ति—

| | | |
|---|---|---|
| Soup | सूप (:) | पक्वा द्विदला, निःस्यन्दः |
| Semi | सामि= | अर्धं |
| Juice | यूष (:) | रसः |
| I am | अहम् | अहम् |
| Morn | मरणं (म्) | मृत्युः |
| patL | पथ (:) | मार्गः |
| Look | लोकृ | दर्शनं |
| Shock | शक् | शोकः |
| Loot | लुण्ठ्. लुण्ठ | लुण्टने |
| young | युवांग(:) | युवकः |
| Mal | मल (:) | मलः |

ख. तदत्रांगलास्ते शव्दाः प्रस्तुतीक्रियन्ते ये वर्णानुक्रमेण पठिता संस्कृत शब्द कल्पा भवन्ति, अर्थवैषम्यमपि नाममात्रमेव भवति। तद्यथा—

| | उच्चारणम् | परिवर्तितमुच्चारणं | संस्कृतं | अर्थः |
|---|---|---|---|---|
| Name | ( नेम ) | नामे | नाम | नाम |
| Center | सेन्टर | केन्तर | | |

( C इत्यस्य K इत्यपि उच्चारणं भवति ) केन्द्र ( म् ) मध्यभागः

| | | | | |
|---|---|---|---|---|
| Sew | स्यू | सेव | सिव | स्यूतौ |
| Axis | एक्सिस | अक्षिस् | अक्ष (:) | अक्षेरखा, मध्येगतः सीलकः |
| Character | के क्टर | चरेक्त्र | चरित्र (म्) | उभयत्रानेकार्थकः |
| | | ( Ch इत्यस्य च इत्युच्चारणं ) | | |
| Committee | कमिटी | सम्मित्ती | समितिः | समिति- |
| | | ( C = स ) | | |
| Earn | अर्न | अर्न | अर्जनं | परिश्रमेण प्राप्तिः |
| Crush | क्रश | क्रुष | कृष् | कर्षणे |
| Adam | आडम | अदम् | अहम् | |
| Sir | सर | सिर | श्रीः । शिर (म्) | शीर्षम् |
| Nose | नोज | नसे, नोसे | नासा | |
| Mind | माईंड | मिनद | मनस् | |
| Same | सेम | समे | सम (:) | |
| Aggressor | अग्रैसर | अग्रेसर | अग्रेसर (:) | [ आक्रमकः पुरोगः ] |
| Clash | क्लैश | क्लेश | क्लेश (:) | |
| Dent | डैंट | दॆंत | दन्त (:) | |
| Saint | सेंट | सैंत | सन्त (:) | |

ग. अधुना आंगल-संस्कृतभापायोरीषद्भिन्नो च्चारणाः परं सामानार्थकाश्शब्दा दृश्यतां भवता--

| | |
|---|---|
| Invention | अन्वेषण (म्) |
| Mixeure | मिश्रण (म्) |
| Virtue | वीरत्व (म्) |
| Ultimatum | अन्तिमेत्थम् |
| Et cetera | इत्यादिः |
| Source | स्रोतस् |
| Go | गोः ( वाणीः, धेनुः ) |
| Go | गम् |
| Oscygen | ओषजन (:) |
| Sister | स्वसृ |
| Cruel | क्रूर (:) |
| Rude | रुद्र (:) |
| Automatic | आत्मतिक (तिक्=गमने) |
| Preach | प्रचार (:) |
| You | यूयं |
| Absorption | अवशोषण (म्) |
| Gravity | गुरुत्व (म) |
| Daughter | दुहितृ |
| Brother | भ्रातृ |
| Mother | मातृ |

| | | | |
|---|---|---|---|
| Mouth | मुखः | Useful याः | सुफलः |
| Water | वारि | Me | मे |
| She | सा | we | वयम् |

घ. अधुना समानोच्चारणाः परं भिन्नार्थकाः शब्दाः केचित् संगृह्यन्ते.

| आंगलाभाषा | अर्थः | संस्कृतं | अर्थः |
|---|---|---|---|
| Craw | काकः | क्रोष्टृ | फेरुः |
| Cut | कर्तने | कट् | गमने |
| Age | युगं | राज् | दीप्तौ |
| Earth | धरा | अर्थ | उपयाञ्चायाम् |
| Shut | पिधानं | शठ् | अवयवे |
| Fail | अनुत्तीर्णः | फेल् | गतौ |
| Law | विधौ | ला | आदाने दाने च |
| Put | स्थापने | पुट् | संश्लेषणे |
| Head | शीर्षं | हेड् | वेष्टने |
| Vain | वृथा | येण् | गतिज्ञानचिन्तादिषु |
| Which | यः | विच् | पृथग्भाते |
| Cough | कासः | कफः | श्लेष्मा |
| Ram | भेडकः | रामः | रामचन्द्रो दाशरथिः |
| Para | परिच्छेदः | परः | अन्या, |
| Per | प्रति | पर | अन्यः |
| Cent | शतम् | सन्त | स्वजन शंजलौ |
| Sent | प्रेषितम् | — — | --- |
| Sir | श्रीमान् | सरः | तटाकः |
| You | यूयं | यु | बन्धने |
| May | मासविशेषः, | मे | प्रणिदाने |
| Me | माम् | मी | गतौ |
| Miss | श्रीमती | मिष् | से चने |
| Mith | मिथ्येतिहासः | मिथ् | हिंसायाम् |
| Man | मानवः, पुरुषः | मन | ज्ञाने |

| | | | |
|---|---|---|---|
| Day | दिवसः | दे | पालने |
| Crane | प्रार्थनं | क्रेत्र | सेवने |
| Cap | टोपिका | केप् | कम्पने |
| Un | नकारः | अन् | प्राणने |
| Axe | कुठारः | अक्ष् | एकत्र करणे |

ङ. अन् इति शब्दो यथा संस्कृते नत्रि प्रयुज्यते तथैवांगलभाषायामपि।

तद् यथा—

| | |
|---|---|
| Un + inportant | अन् + अश्वः |
| Un + easy | अन् + आगतः |
| Un + educated | अन् + उपस्थितः |

च. यथा सजीववस्तुनः सम्बन्धप्रदर्शनार्थमांगलभाषायाँ एपौस्ट्राफी-एस् ( 's ) इत्यस्य प्रयोगः क्रियते, तथैव संस्कृते अकारान्तशब्दस्य सम्बन्धकारके 'स्य' इत्यस्य प्रयोगो भवति, यथा।

| | |
|---|---|
| Mohan's | मोहनस्य |
| Ram's | रामस्य, |

छ. संस्कृते यथाऽकारान्तशब्दे अकारस्य सद्भावो मन्यते तथैव आंगलभाषायामपि अकारान्तशब्दे 'अ' इति प्रयुज्यते, तद्यथा

| | | | |
|---|---|---|---|
| Surendra | सुरेन्द्रः | Ashoka | अशोकः |
| Manava | मानवः | Rama | रामः |

ज. संस्कृते यथा द्र-अव-उपसर्गौ स्तस्तथैव आंगल भाषायामपि Pre, ab इति स्तः, तद्यथा—

| | | |
|---|---|---|
| Pre-arrange | प्रगतः ] | अथवा पुरा-कथा |
| Pre-planned | प्र निष्टः | पुरा वृत्तम् |
| Ab normal | अव-मानितः | |

एवं स्पष्टं यद् संस्कृतांगलभाषयोः संम्बन्धा अनेकधा निकटतमाः। ते भाषाद्वयस्य पुराकालिकान् कौटुम्बिकान् मम्बन्धानेव द्रढयन्ति ध्रुवम्।

१--एम. ए. ( संस्कृत-हिन्दी ), पीएच. डी., हिन्दी विभागाध्यक्ष,। बी. ए. एम. खालसा कालिज, गढ़शंकर ( पंजाब )

—:॰:—

# पद्य-पद्यत्वम्


## डॉ० रमाकान्त शुक्ल

अध्यक्ष-संस्कृत-विभाग, इन्दिरा कलासङ्गीत विश्वविद्यालय, खैरागढ़ म० प्र० )


प्रतनसंपूर्णं भारतीयवाङ्मयं पद्य-प्रधानम्। संस्कृत-भारते लक्षणग्रन्थाअपि पद्यत्वेन प्ररचिता। अस्माभिरेतत् ज्ञायत एव। पद्य-काव्ये पद्यत्वं किम्, येन सहितं काव्यं पद्य-काव्यम्, एतदभिधाने सङ्कोचः सञ्जायते। लघुलेखेऽस्मिन् पद्यकाव्याय प्रत्नाप्रत्नाचार्यप्रतिष्ठितस्य कविभिरनुसृतस्य च पद्य-काव्यात्मभूततत्त्वस्य सुधिजनस्मारिकामयी काचिद् चर्चा अभीष्टा।

पद्यशब्दस्य व्युत्पत्तिलभ्यार्थानुसारेण पदेषु विभक्ता कविनिर्मितिः पद्यमिति विज्ञेयम्।१ पदेषु किमेतादृशं वैशिष्टयं येन तस्य पद्यत्वं विशदी भवति, चिन्तनीयोऽयं विषयः। पद्यत्वं काव्यस्य लयात्मक संस्कार विशेषः येन विरहितं पद्यकाव्यम् अकाव्यं गद्यं वा। अनेन संस्कारेण रहिता पद्यता तथैव उपहसनीया, यथा मम्मट-दृष्टौ शक्ति-विहीनं कवेर्काव्यम्। काव्ये विशेषतः पद्य-काव्ये भाव-माधुर्यभाषा-प्रवाहादीनां योजनम् आवश्यकम्, अङ्गीकरणीयम्। ध्वन्यात्मक-ताल-लयता, यदर्थं वेदमंत्रकाल एव छन्दोव्यवस्था आविष्कृता, इयं पद्यस्यात्मा। संस्कृत-साहित्य-शास्त्र परम्परा पद्यं छन्दोबद्धं परिचाययति।२ कवितायाः।

आचार्यं भरतेन शब्दोऽस्ति···न च्छन्दश्श वर्जितम्॥ ( ना०शा० – १४।४७
निरुक्तरूपोद्भासकगुणः छन्दः प्राचीन-विचार परम्परायां विविधार्थेन सह व्याख्यातम्। वैदि ग्रन्थे यत्र-तत्र एतद् रस-पर्यायेण प्रतिपिठतम् निरूक्तकारेण, निरुक्ते (७।१२) छन्दां छादनात् अनेन रूपेण लक्षितम्। इत्थम् ऋग्वेद भाष्य भूमिकायां सायणेनाप्यभिधीयते 'आच्छ दकत्वात् छन्दः'। छदिरः (अर्जने) (छदि-संवरणे वदि-(आह्लादने दीप्तौ च) धातुभ्यः छन्दश्शब्द निष्पद्यते। छन्दसि काव्यस्यावरणाह्लादी वेशिष्ट्यानि आचार्यैः दृष्टान्यपि। छन्दा काव लयमुत्पाद्य यां संप्रेषणशीलताम्, यां रसात्मकताम् यां रमणीयताम्, यां रागात्मकताञ्च जनयति, त काव्यम् आह्लादनेन पूरयन्ति।

कवितायै पद्यकाव्याय लयताल-विनियो परमावश्यक आसीत्, कारणादस्मात् वैदिक-लौकि संस्कृतानन्तरं प्राकृतापभ्रंशहिन्दपादीष्वपि छन्द शास्त्रीया प्रायोगिकी च प्रतिष्ठा अक्षुण्णा प्राकृतापभ्रंशहिन्दीषु नूतनानि छन्दांसि उद्भा वितानि, तानि कविभिः प्रयुक्तान्यपि च। पद्या

---

१—पदं चरणमर्हतीति पद्यम्, यदनन्तरं यत्प्रत्ययेनास्य सिद्धिः।

२—यथा साहित्य-दर्पणे आचार्यविश्वनाथोक्ति.–'छन्दोबद्धपदं पद्यम्' ( सां० द० ६।३२४ )।

३—रसो वै छन्दांसि।—शतपथ ब्राह्मणे-७।३।१।३७

छन्दः कथमपेक्षितम् ? लयात्मक-चारुता भाव-सौष्ठव प्रभृतितथ्यानि पद्य-प्राण-भूततथ्यरूपेण प्रतिष्ठितानि, छन्दोमाध्यमेन प्रकटिता कविवाग्-धारा एतद्-परमापेक्षिततथ्यैः संयुक्ता भवितुमर्हति। पद्यत्वं कवितायां ध्वनेर्नादस्य वा उच्चारणात्मक-संयमनेन यथोत्पद्यते, तदन्यविधिना नूनं कठिनम्, अस्मात् कारणात् एतस्मै छन्दस अपेक्षाऽनुभूता।

कवितायै लयतत्त्वस्य साङ्गीतिक-तत्त्वस्य वा महत्त्वं न केवलं प्राचीनाचार्यैः कविभिश्च स्वीकृतम्, अपितु आधुनिकाचार्यैः कविभिश्चापि अङ्गीकृतम्। हिन्दौ प्रसिद्धः कविःसुमित्रानन्दनपन्तः काव्याय छन्दस आवश्यकतां निरूपयन् छन्दोजन्यलयात्मक-सौन्दर्यं प्रति इत्थं भणति--"कविता तथा छन्द के बीच घनिष्ठ संबंध है। कविता हमारे प्राणोंका सङ्गीत है, छन्द हृत्कम्पन। कविताका स्वभाव ही छन्द में लयमान होना है"। छान्दसी-रागात्मिकाभि व्यक्ति संवलितकाव्यं पाठकानां चेतांसि वैलक्षण्येन आह्लादयति, अत्र श्रेष्ठ हिन्दी छायावादितः निराला कवेः सम्मतिः ध्यातव्या - "छन्द कानून के अन्दर सीमा के सुखमें आत्म-विस्मृत होकर सुन्दर नृत्य करते हुये, उच्चारणकी शृंखला रखते हुये श्रवण माधुर्यके साथ ही साथ श्रोताओंको सीमाके आनन्द में भुला रखते हैं।" पद्यस्य लयशीलता पाश्चात्यविचारकैरपि अपेक्षिता, अस्मिन् प्रसङ्गे श्रीदाते महाभागनाम कथनम् विशेषेण स्मरणीयम्, येन पद्य-प्रबन्धे लयीय-विधानम् आवश्यक रूपेण प्रतिष्ठितम्। कवितायां लयात्मक सौन्दर्याभि वृद्धिः, या कविताया: चारुतामनोहरतारमणीयादि-गुणानां वर्द्धिनी, तद्-समुचितसन्निवेशाय आचार्यं क्षेमेन्द्रेण विषयानुकूल छन्दोनिर्माणाय प्ररितम्। 'शेषाणामर्थयोगेन छन्दः कार्यं प्रयोक्तृभि !' ( ना० शा० १६।१२० ) एतावदुक्तवता भरतेनापि प्रकारान्तरेणेदमनुमोदितम्।

उपरि संक्षेपेण इदं गदितं यत्, लयता, या ध्वनेसंयमिता व्यवस्था, सा पद्यस्य पद्यता, तया रहिता कविता विकला। अन्यवैशिष्ट्य-पूरितमपि कविकर्म चेत् ध्वनेरविरलप्रवाहशून्यं, तर्हि तस्मै पद्यशब्दाभिधानं पद्यशब्दावधीरणमेव। लयसदृशं विधानं कविताया: संप्रेषणशीलतायै, तस्या माधुर्यं प्रवाहाय परमोपादेयम्। 'छन्दः पादौ तु वेदस्य'— इदमभिधाय महर्षिपाणिनिरप्येतद् स पोष-यति। लयादिकसंयोजनं न केवलं पद्यकाव्यस्य अपितु गद्यकाव्यस्यापि उत्कर्षाय साहाय्यं विद-धाति। महाकविबाणस्य गद्योत्कर्षस्य कारणं तस्य लयपेशलत्वमपि।

अधुना विगतकतिपयवर्षपूर्वतः लयोत्पादवृत्त-तुकादिसंयमनमतिक्राम्य कविभिः पद्य काव्यं क्रियते। हिन्दीभाषा-साहित्ये पाश्चात्यसाहित्य-प्रभावत्वात् इयं रचनाशैली द्रुतगत्या विकसिता। संप्रति कविता बाहुल्येन अनयैवरीत्या प्रस्तूयते। यद्यपि आधुनिकी कविता गुण-दोष-विवेचनं नास्माकमभिप्रेतम्, नात्रतदौचित्यम्, किन्तु निन्दा स्तुत्यतीत सांप्रतिककवि-प्रणीतकवितास्वरूपं प्रति किञ्चिदभिधानमेवमदीयोद्देश्यम्। विचारणीयमिदं

१ – काव्यरसानुसारेण वर्णनानुगुणेन च कुर्वीत सर्ववृत्तानां विनियोगं विभागवित् सुवृत्ततिलके – ३।७।

यत्, या कविता लयतालवृत्तादिकशून्या, या नीरसा या निःसंप्रेषणशीला, सा कविता कथम्, गद्यं कथन्न ? चेत् कविताशब्दः पद्याय रूढ़ !, तदा तस्यां काचिद्-लय-भाव-माधुर्य-प्रसाद--प्रसारिणी-नाद-त्रिनियोग-व्यवस्था भवनीया। ध्वनेरारोहावरोह-विधायकान्तर्भूतनियमो वाक्येषु पद्यत्वार्हतां वितनोति। भाषा स्वीयलयात्मकगुणं ( सम्यग् ) पद्ये व्यनक्ति, न तु गद्ये, यदि पद्यमपि लयशून्यतां भजिष्यति तदा काव्यस्य लय भावादिक महत्वाधायि तत्त्वानां विलयो भविष्यति। केचन आधुनिकाः विचारकाः रचनाकाराश्च पारम्परिक-लयव्यवस्थां तिरस्कृत्य गद्यवत् कविता-निर्मितौ कवीन् प्रेरयन्ति तथा यस्यां विधायां केवलोपर्यध-स्लेखनप्रकारेणैव पद्यत्वं स्फुटति, एतादृशे पद्याभासरूपे कवितारूपेण प्रथिते गद्ये, यदि काचिद् लयात्मकरमणीयता मपेक्षते, तर्हि नैराश्यमेव तद्-हस्ते आयास्यति। एतेन सह, चेत् कश्चित् तत्र लय विधानस्य आग्रहं करोति, तर्हि तस्याग्रहो एव कथितु शक्यते। इलियटप्रभृतिपाश्चात्य-विचारकानां विचारान् आदर्शं मन्यमानान् नूतन भारतीय विदुषः कवीश्च प्रति अस्माकं निवेदनमेतद् यत्, ते विदेश भूमि प्रतिष्ठित-सामयिककाव्यधाराम् आदर्शरूपेण न स्वीकुर्वन्तु, याथार्थ्यं परिपश्यन्तु, प्राचीनाभिनवपद्यकाव्यस्वरूपं समालोच्य विवेकमाश्रयन्तः विचारयन्तु। यदि, कवितास्वरूपा-दूषक सांप्रतिकानियमित वैकृतिक-प्रवाहो नावरुद्धचते, तदा अनागते कवितायाः किं स्वरूपं भविष्यति, एतद्-संगोति राच्छन्नमेव। कविता-गद्ययो ! नूनं कश्चिद् प्रत्ययात्मकः लक्षणविनियोग-कश्च भेदो भवितव्यः विकृतपद्यरचना पद्यगद्ये द्वेऽपि दूषयिष्यति॥

## इलाहाबादविश्वविद्यालयशताब्दीसमारोहावसरे समायोजिता त्रिदिवसीया संस्कृताभ्युदयसंगोष्ठी

### मिश्रोभिराजराजेन्द्रः [ संयोजकः ]

इलाहाबादविश्वविद्यालय शताब्दीसमारोह-शृङ्खलायां समायोजिता त्रिदिवसीया संस्कृताभ्युदयसंगोष्ठी विगतजनवरीमासस्य नवमदशमैकादशतिथिषु महता साफल्येन विश्वविद्यालयस्य सीनेट हॉलनाम्नि आस्थानमण्डपे सम्पन्ना जाता, १२ जनवरीरात्रौ ४.२० वादने इलहाबाद-आकाशवाण्या प्रसारिता विंशतिकलावधिकाऽऽख्या संगोष्ठया. भव्यतां परिपूर्णतां न साधु प्रमाणयति। लखनऊदूरदर्शनेनापि महता विस्तरेणाभिरुच्या च संगोष्ठीकार्यक्रमाः दृश्याङ्किता वर्तन्ते। आशास्यते यत् शीघ्रमेव निखिलमेव राष्ट्रं त्रिदिवसीयस्यास्य सारस्वतयज्ञस्य दर्शनसुखमपि समवाप्तुं शक्ष्यति।

ऐतिहासिकोयं महोत्सवो भव्यतमारम्भः प्रयाग विश्वविद्यालयीयस्य शततमवर्षस्य। किञ्च देव-वाण्यात्मके संस्कृतक्षेत्रे समाचरितो महानध्य-वसायोऽपि कश्चिद् वर्तते। महोत्सवपूर्त्याऽनया इलाहाबादनगरं सम्प्रति राराज्यतेऽग्रिमपङ्क्तौ संस्कृतजिजीविषाकेन्द्राणां दिल्लीलखनऊ भोपाले ज्जैनग्वालियरकाशीकलकत्ता मद्रासादीनाम्। विभिन्नकेन्द्रेभ्यः समागताः संस्कृतोत्सवसमायोजका अपि संगोष्ठीमिमां भूरिशः प्रशशंसुः।

संगोष्ठीयं पञ्चरात्रेषु विभक्ताऽऽसीत्-महोत्सवो द्घाटनं कविसमवायः संस्कृताभ्युदयं शाकुन्तलञ्च प्रस्तुतवान्। विंशतिप्राया लब्धप्रतिष्ठाः विपश्चित्तल्लजाः तावन्त एव कवय रंगकर्मिण साहित्यिका शतमिताश्च प्रतिनिधयः स्वोपस्थित्या महोत्सवमिममलंचक्रुः। प्रस्तूयते तावद् संक्षिप्त-वृत्तमेकम्।

शुक्रवासरे १ जनवरीतिथौ वेदमंत्रोच्चारण-परिपूते निनादयनवीनामये वाणि, वीणामिति सरस्वतीस्तवननिनादिते श्रीनेत्रा ( शीनेट ) स्थान-मण्डपे समारोहस्यास्यो द्घाटनं कृतम् अवधविश्व-विद्यालयकुलपतिभिः प्र० अतुलचन्द्रबनर्जिमहोदयैः। सभाध्यक्षपदं निर्व्यूढं प्रो० डॉ० विश्वनाथ भट्टाचार्य वर्यैः। सारस्वतसम्मानव्यतिकरेण महिमाऽस्य महोत्सवस्य द्विगुणितः। प्रयागविश्वविद्यालवीय संस्कृतविदुषा बृहत्त्रयी ( डॉ० आद्याप्रसादमिश्रः पं० लक्ष्मीकान्तदीक्षितः डॉ० चण्डिकाप्रसादशुक्ल-श्चेति ) प्रतिकुलपतिभिः डॉ० श्रीत्रिविक्रमपतिभिः साक्षतचन्दनमाल्योष्मप्रवाहकं सादरं सविनयम् अभिनन्दिता। सनातनोपाह्वः डॉ० रेवाप्रसाद-द्विवेदोऽपि सद्योविरचितेनैकेन श्लोकेन आचार्यत्रय-मभिननन्द।

तस्मिन्नेव दिनेऽपराह्णे कविसमवायात्मके द्वितीयसत्रे रसगर्भनिर्भरं हृदयावर्जम् अभूतपूर्वञ्च संस्कृतकवितामृतवर्षणसौख्यमनुभूतं मध्येशान्तं निषण्णै विषण्णैर सहृदयैः इयं कविगोष्ठी प्रतिकुल-पतिभिः प्रो० त्रिविक्रमपतिभिः स्वोपज्ञसरस्वती-स्तोत्रपाठेन समुद्घाटिता, डॉ० रेवाप्रसादद्विवेदि-भिश्च स्वाध्यक्षतया सम्भूषिता। कविसमज्यां सञ्चालयामास मिश्रोऽभिराजराजेन्द्रः संस्कृता-भ्युदय संगोष्ठीसंयोजकः। डॉ० कमलेशदत्तत्रिपाठी ( वाराणसी ) प्रो० श्रीनिवासरथः (उज्जयिनी) डॉ० भास्कराचार्यत्रिपाठी ( भोपालम् ) डॉ० रमा-कान्तशुक्ला (दिल्ली) डॉ० दीपकघोष (कलिकाता) डॉ० पुष्पादीक्षिता ( बिलासपुरम् ) डॉ० नलिनी-शुक्ला (कानपुरम्) डॉ० बीरभद्रमिश्रः (लक्ष्मणपुर-लखनऊ) डॉ० घनश्याम तिवारी डॉ० प्रशस्यमित्रः [ रायबरेली ] डॉ० चन्द्रभानु त्रिपाठी [ प्रयागः ] श्री सुव्रतत्रिपाठी [बरेली] श्री जनार्दनप्रसादपाण्डेयः डॉ०हरिदत्तशर्मा डॉ० रेवाप्रसाद द्विवेदी [अध्यक्षः] डॉ० राजेन्द्रमिश्रश्च स्वललितललिताः कविताः श्रावितवन्तः आकाशवाण्याः सेवानिवृत्तः संस्कृत-कार्यक्रमनिष्पादकः ( प्रोड्यूसर ) श्रीनर्मदेश्वरो-पाध्यायः काव्यामृतं प्रत्यक्षमास्वादयन् कविसमवाय मिमं स्वजीवनस्यानुत्तमं श्रेष्ठञ्च काव्यानुभवं स्वीचकार।

१० जनवरीतिथौ पूर्वाह्णे संस्कृताभ्युदयनाम्नि तृतीये सत्रेऽधिमञ्चं समवेतानां प्रकाण्डपण्डिताना संस्कृताभ्युदयविषयिणी हृदयान्दोलनक्षमा तथ्योदग्रा तात्त्विकी च परिचर्चा जाता। शिखरस्थैः विद्व-द्वर्यैः डॉ० विद्यानिवासमिश्रैः काशीविद्यापीठकुल-पतिभूतैः समुद्घाटिता डॉ० कमलेशदत्तत्रिपाठिभि-स्वाध्यक्षत्वेन श्रीमण्डिता इयं परिचर्चा होराच-

तुष्टयं यावत् प्रावर्तत। आचार्यमानिकचन्द्रमिश्रः पं० प्रभातशास्त्री [ प्रयागः ] डॉ० विश्वम्भरनाथत्रिपाठी [ गोरखपुरम् ] प्रो० श्रीनिवासरथ [ उज्जयिनी ] डॉ० कृष्णकान्तचतुर्वेदी [जबलपुरम्] डॉ० रेवाप्रसादद्विवेदः [ वाराणसी ] च प्रमुखवक्तृरूपेण स्वविचारान् स्थापितवन्तः। परिचर्चान्ते च सर्वसम्मताऽङ्गीकृतः प्रस्तावोऽप्येकः पारितोयेन केन्द्रीयशासनं निवेद्यतेऽधिसंस्कृतं स्वदृष्टिकोणपरिवर्तनार्थम् !

अस्मिन्नेव परिचर्चासत्रे प्रथमचरण एव संगोष्ठी संयोजकैः डॉ० श्रीराजेन्द्रमिश्रैर्विरचितम् इलाहाबादविश्वद्यालय जीवनयात्रानिरूपकं शताब्दयुत्सवस्मारकञ्च नूतनं काव्यं शताब्दीकाव्यमित्यभिधं लोकायार्पितं डॉ० विद्यानिवासमिश्रमहोदयैः।

महोत्सवस्य नेशे चतुर्थरात्रे कविकुलगुरु कालिदासविरचिता आकल्पमहा वयौवना नाटचकृतिः अभिज्ञानशाकुन्तलनाम्नो छात्रैरध्यापकैश्च मञ्चमुपनीयाभिनीता। सीनेटहालस्य प्रतोलीमधिरूढै.-सहस्रमवमितं कुट्टिमनिविविष्टैश्च प्रायेण चतुस्सहस्रमितैः छात्रदर्शकैः प्राध्यापकैः नागरजनैः पुरुषैर्महिलाभिश्च साभिरुचि नयनपाथेयीकृतमिदं नाटचरसायनं केषां तृप्ति विस्मयं चन चक्रे। दर्शकाणामियतीं संख्या विलोक्य सर्वेऽपि प्राघुणा आश्चर्यचकिताः सञ्जाताः। डॉ० राजेन्द्रमिश्रस्य डॉ० राजलक्ष्म्याश्च समवेतनिर्देशने डॉ० हरिदत्तशर्मणा संयोजितं, डॉ० हरिशंकरत्रिपाठिना च प्रस्तुतमिदं मञ्चनमद्यापि यथावसरं चर्च्यते दर्शकवृन्दैः।

११ जनवरीतिथौ पूर्वाह्णे पञ्चमसत्रे समारोह समापनं जातम्। अस्मिन् सत्रे सभाध्यक्षा आसन् डॉ० राधावल्लभत्रिपाठिन. सागरविश्वविद्यालये संस्कृताध्यक्षा मुख्यातिथयश्चासन् डॉ० कृष्णकान्तचतुर्वेदिमहोदयाः जबलपुरविश्वविद्यालये संस्कृतविभागाध्यक्षाः। इलाहाबादविश्वविद्यालयकुलपतय डॉ० रामेश्वरप्रसादमिश्रमहोदयाः सर्वेभ्योऽभिनेतृभ्यः प्रमाणपत्राणि पारितोषिकाणि समुपायनानि च समर्पितवन्तः।

इयं स्मरणीया संस्कृतोपकारकरणी संस्कृतसामर्थ्यदर्शिनीच संगोष्ठी कुलपते, डॉ० रामेश्वरप्रसादमिश्रस्य संरक्षणे संस्कृतप्रवाचकेन लोकप्रियहिन्दीसंस्कृतभोजपुरी कविनाऽभिराज डॉ० राजेन्द्रमिश्रेण संयोजिताऽऽसीत्। संगोष्ठीसमितेरन्ये सदस्याः आसन् प्रो० डॉ० सुरेशचन्द्रपाण्डेयः डॉ० सन्तनारायणश्रीवास्तवाः पं राजकुमारशुक्लः डॉ० हरिशंकरत्रिपाठी डॉ० राजलक्ष्मीवर्मा डॉ० वीरेन्द्रकुमारसिंह डॉ० रुद्रकान्तमिश्रः डॉ० हरिदत्तशर्मा डॉ० शंकरदयाल द्विवेदी डॉ० मीना बनर्जी डॉ० साधना वेदी च।

प्रेषक--मिश्रोभिराजराजेन्द्रः [ संयोजकः ]

[ प्रकाशनवैलम्ब्यवेदनाविनिवेदनम्-सं०

# धन्यो गृहस्थाश्रमः ?

रच०--रामस्वरूप--शास्त्री अमरः"

तालबेहट वास्तव्यः

गृहे मिष्टान्न-पानं स्यादातिथ्यं शिवपूजनम् ।
सपर्या गुरुदेवानां--गृहस्थो धन्यताङ्गतः ॥ १ ॥
सौम्याः सुताः प्रिया भार्या सद्द्रव्यं दीर्घजीवनम् ।
परान्नेन विरक्तिः स्याद् गृहस्थस्य शुभे गृहे ॥ २ ॥
न्याय - सम्पादितोऽ र्थोऽ तिथीनां प्रिय--
स्तत्वज्ञानैक-निष्ठो गृहस्थोऽपि सन् ।
सत्यवादी स्वधर्म्मे रतः शास्त्रविन्--
मुच्यते पितृभक्तो हि संसारतः ॥ ३ ॥
सङ्गमः सज्जनानां गृहं पावनं;
सेवकाः स्यु निदेशे सदा तत्पराः ।
आत्मजाश्चात्मजाः स्युः सुमेधाभृतः,
सुप्रिया सौम्य-सम्भाषिणी सम्मता ॥ ४ ॥
सद्धनं मित्रवर्गश्च सौख्यप्रदः
स्वप्रियायां रतिः पूजनं श्रीहरेः ।
सर्वदाऽऽनन्द--पूर्णं स्वगेहं भवेत्
तद्--गृहस्याश्रमो धन्यधन्यो मतः ॥ ५ ॥
चत्वार आश्रमा यस्य
गृहस्थस्य समाश्रिताः ।
दानं ज्ञानं च सम्मानं,
गृहस्थः कुरुतेऽनिशम् ॥ ६ ॥
ऋद्धि- सिद्धि- समृद्धिश्च
गृहस्थस्य गृहे स्थिता ।
आयातः परमाधारः
परमात्मा मनोहरः ॥ ७ ॥

# आत्म--निवेदनम्

रच० रामस्वरूप शास्त्री अमरः

तालबेहटस्थः

माननीयाः सुधीवर्य-सम्पादकाः !

सादरं सन्नति र्मे भवेत् स्वीकृता।

मिश्रवर्या ! भवन्तो दयासागरा !!

रामस्वरूपेण। संप्रार्थ्यसे प्रार्थ्यते ॥ १ ॥

नागतं, मान्यवर्याः ! परीक्षाफलं,

प्रार्थनाऽनेकशस्तत्र सम्प्रेषिता।

दुःखिन सन्ति छात्रा दुःखी सेवकः

प्रेषणीयं बुधैस्तत्फलं वेगतः ॥ २५ ॥

संस्कृतेः संस्कृतस्येह ये सेवका--

स्ते पराधीनस्वान्ताः परं पीडिताः।

केऽपि ध्यानं ददत्येव नो-शासका--

स्त्रासकाः सन्ति गौराङ्गभाषाविदः। ३॥

साञ्जलिः पाणि-पङ्केरुहे प्रेष्यते

प्रार्थनैषा पुनः पूजनीयाः स्वतः।

प्रेषयित्वा परीक्षा-प्रमाणादिकं

स्वान्त-शान्ति र्विधेया बुधैः साम्प्रतम्।

श्लोक बद्धा विचारा मया प्रेषिता--

स्ते प्रकाश्याः सुधीभिः स्वसूर्योदये।

सन्तु सौम्याः सुबोधास्ततो मासिके,

स्थान--दानानुकम्पा भवेत् पंडिताः ॥

निरालम्बा वयं विज्ञा जगदम्बा सहायदा !

भोजे गते भुजें र्हीनाः पराधीनाः स्म पङ्गवः ॥६॥

वृत्तिः परमहंसीया केवला प्राणदायिनी।

पराम्बा-भक्तिपीयूषं मृत्युलोकेऽस्ति मादृशाम् ।:७॥

ध्यानं रामस्वरूपस्य, भक्तः नित्यं करोति यत्।

रामस्वरूपतां याति, सः परमहंसोऽपि सन् ॥ सं०

# पण्डितप्रवराः श्रीगोविन्द--नरहरि--वैजापुरकराः

विगतज्येष्ठशुक्लसप्तम्यां [ ४ जून तालिकायां वाराणस्यां हृदयगत्यवरोधात् पण्डितप्रवरवराणां श्रद्धेय-श्रीवैजापुरकरमहाभागानाम् आकस्मिक-प्राणोत्क्रमणेन पण्डितसमाजस्य या क्षतिः जाता, सा भविष्यति काले पूरयितुं न शक्यते। द्वितीयेऽहनि श्रीमतः चिरंजीविन्याः कन्यायाः विवाहोत्सवः संकल्पितः आसीत्। पश्चिमबंगप्रदेशस्य आदरा-नगरतः धर्मशालायां वरयात्रा समागच्छति स्म, द्वारि वैजापुरकरमहाभागाः तामभ्युपगन्तुं गताः। सम्मुखे वरः समागतः। पुरन्ध्यः तस्य आरार्तिक्यं मङ्गलं समाचरन्ति स्म। वरं दृष्ट्वा यः हर्षातिरेकः श्रीमतां हृदये, स न स्थानमाप्नोत्। फलतः श्रीमतां प्राणा एव उत्क्रान्ताः। अधुना श्रीमतां यश कायः-जरामरणजभयान् मुक्तः।

ग्वालियराभिजनश्रीरामचन्द्ररावतनूजाः श्रीनरहरिशास्त्रिवैद्यमहाभागाः शैशव एव मातृपितृ-विहीनाः मातामहेन साकं वाराणस्यां समागताः ज्यौतिषाध्ययने प्रेरिताः, परं रुचेरभावात् गृहतः पलायिताः। वैद्यमार्तण्डानां श्रीध्येटूशास्त्रिणां [ नन्दागिरि लक्ष्मणशास्त्रिणां ] शरणमागत्य आयुर्वेदशास्त्रमर्जयन्ति स्म, तेन च आजीवनं अकिञ्चनानां चिकित्सासेवां निःशुल्कं व्यदधुः। बैजापुरकर महाभागाः श्रीमतामेव ज्येष्ठपुत्रा आसन्। श्रीमतां जन्म २६ अगस्त १९२२ ई० तालिकायां समभवत्।

श्रीमद्भिः पण्डिश्रीगोपालभट्टानां सान्निध्ये रामघट्टस्थसांगवेदविद्यालये संस्कृतस्य प्रारम्भिकी शिक्षा गृहीता। ततः श्रीमतां शिवदत्तमिश्र – केशव-मिश्रवामाचरण भट्टाचार्य—खिस्तेमुकुन्दशास्त्रि – कान्तानाथशास्त्रि तैलङ्गसदृशगुरुजनेभ्यः न्याय-शांकरवेदान्त-साहित्यादिशास्त्राणां गहनमध्ययनं विहितम्, पितृचरणेभ्यश्च आयुर्वेदस्य सैद्धान्तिक-मध्ययनं कृतम्।

१९५४ ई० तः १९७१ ई० पर्यन्तं श्रीमद्भिः चिदानन्दसंस्कृतविद्यालय- उदासीनस्याद्वाद-- संस्कृतमहाविद्यालयेषु विविधा विषयाः अध्यापिता। एवमेव श्रीमद्भिः विश्वनाथपुस्तकालये उपग्रन्थपालपदस्य, अच्युतग्रन्थमालायाः प्रथम-सम्पादकपदस्य, अखिलभारतसर्वसेवा संघस्य च सम्पादनस्य उत्तरदायित्वं निभालितम्।

पांडित्येन सह पत्रकारितापि श्रीमतामङ्ग प्रत्यङ्गं प्रतिवसति स्म। 'सन्मार्ग' दैनिकपत्रं श्रीमतां सम्पादनकाले उत्कर्षमाप्नोत्। **'सूर्योदय' संस्कृत-मासिकस्य प्रधान**—सम्पादकरूपेण श्रीमद्भिः संस्कृतपत्रकारितायाः उच्चमानदण्डः स्थापितः। 'शक्ति'–'सिद्धान्त'–गीताधर्म-श्रीकृष्णसन्देशा' दिपत्राणां सम्पादकमाध्यमेन भवद्भिः आध्यात्मिक-पत्रकारिता उच्चतां नीता।

विविधग्रन्थाः श्रीमद्भिः अर्थकार्श्यात् विविध-विदुषां नामभिः प्रणोताः।

श्रीमद्भिः सम्पादितेषु ग्रन्थेषु खण्डनखण्ड-खाद्यम्, परिभाषेन्दुशेखरः, वेदभगवान्,' भक्ति-रसार्णवः, विचारपीयूषम्, इत्यादयः समुल्लेख्याः। अनूदितग्रन्थेषु भूदानगङ्गा–गीताप्रवचनानि, 'भारतीयेतिहासाची सात सोनेरीपाने' इत्यादयः उल्लेख्याः।

श्रीमन्तः प्रायः वर्षचतुष्टयं यावत् साहित्य-अकादमीसंस्थायाः परामर्शदातृसमितेः सदस्या आसन्। श्रीमद्भिः सप्तदशवर्षाणि यावत् प्रादेशिक-संस्कृतविद्यालयाध्यापकसमितेः महामन्त्रिरूपेण उत्तरप्रदेशस्य संस्कृताध्यापकानां जीवनस्तर-मुन्नमयितुं सततं संघर्षः कृत, तत्र च सफलता अर्जिता।

१९७५ ई० श्रीमन्तः राष्ट्रियशिक्षकरूपेण महा-महिमराष्ट्रपतिभिः सभाजिताः। साम्प्रतं श्रीमन्तः 'कल्याण' मासिकपत्रस्य सम्पादने निरताः आसन्, यत्र 'शक्तिउपासना–अङ्कस्य प्रकाशनं महत्वपूर्णं वर्तते। तथैव 'शास्त्र चूडामणि' आचार्ययोजनाया मपि श्रीमन्तः विशिष्टमध्ययनंमनुसन्धानं च विदधति स्म।

कर्मैव श्रीमतां जीवनादर्शः आसीत्, कठोर-परिश्रम एव भवद्भ्यः यथार्थः श्रद्धाञ्जलिः स्यात्।

जगन्नाथशास्त्रितैलङ्गः

पञ्जीकृत- संख्या-एल० आर० एन०/२१४

# सूर्योदयस्य नियमाः

पत्र संहिता—

१—"सूर्योदयः" मासिकपत्रस्य वार्षिकं शुल्कं पञ्चदशरुप्यकाणि वर्तन्ते। धनादेश-(मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० पी० द्वारा प्रेषणे ३।० पथक् प्रदेयानि स्युः।

२—आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनप्रथमाङ्कतः ( जनवरी अंकतः ) ग्राहकत्वं स्वीक्रियते। माध्यमिकेन केनापि अंकेन न स्वीक्रियते।

३—आंग्लमासस्य २६ तमे दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। बारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्दनागमस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४—लेख-कवितादीनां भाषया संयतया सरलया शुद्धया च भाव्यम्। प्रकाशनीयलेखादीनां स्पष्टाक्षरे कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका-(टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५—सम्पादकीय-विषयसम्बद्धे पत्रव्यवहारे 'सम्पादकः' इति, व्यवस्था-विभागीय पत्रव्यवहारे च व्यवस्थापकः इति च स्पष्टं लेखनीयम् येन उत्तारलाभे मुधा विलम्बो न भवेत्।

विज्ञापनशुल्कम् :—

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकबारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य कृते विशेषसौविध्याय पत्रव्यवहारः कार्यः।

| | | | |
|---|---|---|---|
| साधारणस्य प्रतिपृष्ठम् | ५००) | साधारणस्य प्रत्यर्द्धपृष्ठम् | २००) |
| साधरणस्य चतुर्थांशपृष्ठस्य | १००) | आवरण-चतुर्थपृष्ठस्य | १०००) |
| आवरण-तृतीयपृष्ठस्य | ७००) | प्रथमद्वितीयावरणपृष्ठयोः विज्ञापनं न स्वीक्रियतेः | |

—सङ्केतः—

**'सूर्योदयः'—कार्यालयः, श्रीभारतधर्ममहामण्डलम्, लहुराबीर, वाराणसी—१**

**'सूर्योदयः'**

**श्री भारतधर्ममहामण्डलस्य**

**मासिकं संस्कृतमुखपत्रम्**

**वा रा ण सी**

—:❁:—

सम्पादकः, प्रकाशकः, मुद्रकश्च-डॉ० श्रीपरमहंस मिश्रः, प्रतिनिधिः, श्रीभारतधर्ममहामण्डलम् लहुरावीर वा रा ण सी।
मुद्रणस्थलम्—हनुमान मुद्रण यन्त्र, बड़ी पियरी, वा रा ण सी।

सेवा में,

.................. ..................

.................................

.................................